Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

श्रीः ।

शास्त्रमुक्तावळी - ८

सप्तभङ्गीतरङ्गिणी ।

नाम

जैनतर्कग्रन्थः ।

विमलदास विरचितः ।

शास्त्रमुक्तावळ्या मञ्जुभाषिण्याश्च सम्पादकेन
श्रीकांची प्रतिवादिभयंकरम् अनन्ताचार्येण
परिशोधितः

श्रीसुदर्शनमुद्राक्षरशालायाममुद्र्यत ।

॥ श्रीकांची ॥

1901

अस्यपुनर्मुद्रणादिषु प्रकाशकएवाधिकरोति ।

इदानी मेतन्मूल्यम् ०-९-०

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

THE

SASTHRAMUKTHAVALI.-8.

SAPTHA BHANGEE THARANGINI.

BY

VIMALA DASA

EDITED BY

P. B. ANANTHA CHARIAR.

PRINTED AT THE

SRI SUDARSANA PRESS

CONJEEVERAM.

1901.

(Copy Right Registered.)

Price As. 9.

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

शास्त्रमुक्तावळी – ८

सप्तभङ्गी तरङ्गिणी ।

विमल दास विरचिता ।

श्रीकाश्ची प्रतिवादि भयङ्करम्

अनन्ताचार्येण परिशोधिता

श्री सुदर्शन मुद्राक्षरशालायाम्

अमुद्र्यत ।

॥ श्री कांची ॥

१९०१

इदानी मेतन्मूल्यम् – ० – ९ – ०

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

श्रीः ।

सप्तभंगीतरंगिण्याः

भूमिका ।

“ सप्तभंगीतरंगिणी ” नामाऽयं जैनग्रन्थः ‘ तंजा ’ नगरसमी पवर्ति ‘ वीर ’ (वीरापुरं) ग्रामवासिना विमलदासेन विरचितेत्य वगम्यते । यद्यपि ग्रन्थान्ते “ विमलदासेन सप्तभंगीनाम तर्क ग्रन्थो लिखितः ” इति पंक्ति र्दृश्यते । तथापि प्राचीनै ग्रंन्थकारै र्बहुभि स्स्वनैच्यानुसन्धान परै स्स्वकृतग्रन्थे ष्वेवमेव विलेखनस्य बहुशो दृश्यमानत्वा दिदमपि नैच्यमनुसन्दधानेना नेनैवं लिखितमिति निश्चित्यास्य ग्रन्थस्य विमलदासप्रणीतत्वमेव निश्चिनुमहे । स्वस्य-वीरनाम ग्रामवासित्वंचायं स्वयमेवान्ते लिखति । अयं कदा कस्य कुले जातइति तु नास्माभि रद्य निर्णेतुं शक्यते।

अस्यचैकमेव पुस्तकं-के-सम्परकुमार चक्रवर्तिनाम्ना ९-११-१८९८ दिने लिखितं चेन्नपुरस्थ राजकीय लिखित प्राचीन पुस्तकशाला-(Government Oriental Manuscripts Library Madras) स्थ पुस्तक प्रतिकृतिरूपं श्रीमता नेल्लूर्विभागान्तर्गत ‘ ओङ्गोल् ’ स्थाने उपमाण्डलिक [सब्कलेक्टर] पदभाजा वेणुगोपाल श्रेष्ठिना प्रहित माश्रित्य तस्यैव श्रेष्ठिनः प्राचीनग्रन्थ प्रचारणोत्साहिनः प्रोत्साहनेन यथाबलं संशोधनं क्वचिदेव टिप्पण्या लंकरणं चाकारि ॥

कार्यवशाच्च प्रोषिते ष्वस्मासु ग्रन्थस्यास्य मुद्रणे शोधनादिषु तस्यैव श्रेष्ठिनो गुणपक्षपातेना स्मासुच निरतिशयेन सौहृदेन बहुमुख मत्राहितवतां श्रीमतां श्रीकांचीनगरस्थ ‘ श्रीशठकोपनिलय ’ नामक संस्कृतविद्याशालाप्रधानाद्ध्यापकता मासेदुषा मस्मत्प्रियसुहृदां श्री श्रीशैल तातार्याणा मुपकार ममुं सततं स्मराम स्तेषुच वहामः कार्तज्ञ्यम् ।

इति निवेदयति

प्र — अनन्ताचार्यः ,

शास्त्रमुक्तावल्याः, मंजुभाषिण्याः,

न्यायरत्नावल्या श्च संपादकः ॥

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

श्रीः ।

शास्त्रमुक्तावळी ।

श्रीम त्पंचगुरुभ्यो नमः ।

स प्त भ ङ्गी त र ङ्गि णी ।

वन्दिरवासुरसन्दोह वन्दितांघ्रिसरोरुहम् ।
श्रीवीरं कुतुका त्कुर्वे सप्तभङ्गीतरंगिणीम् ॥

इहखलु तत्त्वार्थाधिगमोपायं प्रतिपादयितुकामः सूत्रकारः " प्रमाणनयै रधिगम " इत्याह । तत्राधिगमो द्विविधः – स्वार्थः, परार्थश्चेति । स्वार्थाधिगमो ज्ञानात्मको मतिश्रुतादिरूपः । परार्थाधिगम श्शब्दरूपः । सच द्विविधः – प्रमाणात्मको नयात्मकश्चेति । कात्स्न्यंत स्तत्त्वार्थाधिगमः प्रमाणात्मकः । देशत स्तत्त्वार्थाधिगमो नयात्मकः । अयं द्विविधोपि भेद स्सप्तधा प्रवर्तते, विधिप्रतिषेधप्राधान्यात् । इयमेव प्रमाणसप्तभंगी नयसप्तभंगीतिच कथ्यते । सप्तानां भंगानां – वाक्यानां, समाहारः - समूहः, सप्तभंगीति तदर्थः ।

तानिच वाक्यानि –

" स्या दस्त्येव घटः ॥ १ ॥
स्या न्नास्त्येव घटः ॥ २ ॥
स्या दस्ति नास्तिच घटः ॥ ३ ॥
स्या दवक्तव्य एव ॥ ४ ॥
स्या दस्तिचा वक्तव्यश्च ॥ ५ ॥

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

स्या न्नास्तिचा वक्तव्यश्च ॥ ६ ॥
स्या दस्ति नास्तिचा वक्तव्यश्च ॥ ७ ॥ " इति ॥

एत त्सप्तवाक्यसमुदाय स्सप्तभंगीति कथ्यते ।

तल्लक्षणन्तु (१) प्राश्निकप्रश्नज्ञान प्रयोज्यत्वे सति, एक-वस्तुविशेष्यका विरुद्धविधिप्रतिषेधात्मकधर्मप्रकारक बोधजनक सप्तवाक्यपर्याप्तसमुदायत्वम् । वर्तते चेदं लक्षणं दर्शितवाक्यसप्तके । तथाहि - प्राश्निकप्रश्नज्ञान प्रयोज्यत्वंहि परम्परया प्राश्निकप्रश्नज्ञानजन्यत्वम् । तथाच प्राश्निकप्रश्नज्ञानेन प्रतिपादकस्य विवक्षा जायते, विवक्षयाच वाक्यप्रयोग, इति - प्राश्निकप्रश्नज्ञानप्रयोज्यत्व मुक्त सप्तवाक्यसमुदायस्या क्षतम् । एवं घटादिरूपैक वस्तुविशेष्यका विरुद्धविध्यादिप्रकारको यो बोधः - घटोऽस्तीत्यादि रूपो बोधः, तज्जनकत्वंच वर्ततइति ।

तदिद माहु रभियुक्ताः -

" प्रश्नवशा देकत्र वस्तु न्यविरोधेन विधिप्रतिषेधकल्पना सप्तभंगी " इति ॥

अथ मर्थः - 'प्रश्नवशा ' दित्यत्र पञ्चम्याः प्रयोज्यत्व मर्थः । विधिप्रतिषेधकल्पने त्यस्य विधिप्रतिषेधप्रकारक बोधजनिकेत्यर्थः । ' अविरोधेने ' ति तृतीयार्थो वैशिष्ट्यं विधिप्रतिषेधयो रन्वेति । ' एकत्र वस्तुनी ' त्यत्र सप्तम्यर्थो विशेष्यत्वम् । तस्य कल्पनापदार्थबोधजनकत्वैकदेशे बोधे ऽन्वयः । 'सप्तभंगी' त्यस्य सप्तवाक्य पर्याप्तसमुदायत्वाश्रयोर्थः । तथाचा स्मदुक्तलक्षणमेव पर्यवसन्नम् ।

---

(१) प्राश्निकः - प्रश्नकर्ता ।

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

अत्रच प्रत्यक्षादिविरुद्धविधिप्रतिषेधवाक्ये ऽवतिव्याप्तिवारणायाविरुद्धेति। घटोस्ति पटो नास्तीत्यादि समुदायवारणाय – एकवस्तुविशेष्यकेति। स्यादस्ति घटः, स्यान्नास्ति घटः, इति वाक्यद्वयमात्रे ऽतिव्याप्तिवारणाय सप्तेति। घटमानये त्युदासीन वाक्यघटित निरुक्तवाक्यसप्तके तिऽव्याप्तिवारणाय सप्तवाक्य पर्याप्तेति।

यद्यपि सत्यन्तनिवेशस्या तिव्याप्त्यव्याप्त्यादि दोषवारकत्वं नसम्भवति, तथापि (१) प्रतिपाद्यप्रश्नानां सप्तविधानामेव स द्भावा त्सप्तैव भंगा इति नियमसूचनाय तन्निवेशनम्।

ननु- प्रश्नानां सप्तविधत्वं कथं – इतिचेत; जिज्ञासानां सप्तविधत्वात। (२) प्राश्निकनिष्ठ जिज्ञासाप्रतिपादक वाक्यंहि प्रश्न- इत्युच्यते।

ननु- सप्तधैव जिज्ञासा कुतः, – इतिचेत; सप्तधा संशयानामु त्पत्तेः। संशयानां सप्तविधत्वन्तु तद्विषयीभूत धर्माणां सप्तविधत्वात। तादृशधर्माश्च · कथञ्चित्सत्वं, कथञ्चिदसत्वं, क्रमार्पि-

---

(१) प्रतिपाद्यः – यस्मै प्रतिपादनीयं, सः। उत्तरवक्त्रा पुरुषेण प्रश्नकर्तु बोधजननायैवो त्तरवाक्यकथना त्प्रश्नकर्तैवात्र प्रतिपाद्य शब्देनोच्यते।

(२) घट मजान न्पुरुष स्तज्जिज्ञासयाऽऽप्तं कंचि त्पुरुषम् पृच्छति को घट इति। सच कम्बुग्रीवादिमान् घट इत्युत्तरं वक्ति। तत्र को घट इति वाक्येन घट मजानतः पुरुषस्य तज्जिज्ञासा मवगत्यैवा प्तेनो त्तर मुक्तमि त्यंगीकार्यम्, अजिज्ञासितार्थकथनासम्भवात, अन्यथान्यस्यापि यस्य कस्याचि दुक्तिप्रसंगाच्च। तत्पुरुषीयघटविषयक जिज्ञासाज्ञानंचा प्तस्य को घट इति वाक्येनैव जातम्। अतः प्रश्नो नाम जिज्ञासाविषयकज्ञानजनकं वाक्यमेव।

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

तोभयं, अवक्तव्यत्वं, कथञ्चित्सत्त्वविशिष्टावक्तव्यत्वं, कथञ्चिदसत्त्वविशिष्टावक्तव्यत्वम्, क्रमार्पितोभयाविशिष्टावक्तव्यत्वम्, चेति सप्तैव । एवञ्च दर्शितधर्मविषयकाः स्सप्तैव संशयाः । अत्र घटस्स्या दस्त्येववा नवेति कथञ्चि त्सत्त्व सदभावकोटिकः प्रथमसंशयः।

ननुच – कथञ्चित्सत्त्वस्याभावः कथञ्चिदसत्त्वम्, तस्य न संशयविषयत्वसम्भवः, कथञ्चित्सत्त्वेन साकं विरोधाभावात् । एकधर्मिक विरुद्ध नानाधर्मप्रकारकज्ञानंहि संशयः; नत्वेकधर्मिकनानाधर्मप्रकारकज्ञानमात्रं, तथासति – अयंघटोद्रव्य मित्यादौ दन्त्वावच्छिन्न विशेष्यक घटत्वद्रव्यत्वरूपनानाधर्मप्रकारकज्ञानस्यापि संशयत्वापत्तेः । तथाच कथं घटस्स्यादस्त्येव न वेतिसंशयः? इतिचेत्;

उच्यते;– (१) दर्शितसंशये कथञ्चिदस्तित्व सर्वथास्तित्वयोरेव कोटिता; तथाच नोक्तानुपपत्तिः, तयोश्च परस्परम् विरुद्धत्वात् ।

अथ–कुत्रचित्प्रसिद्धयोरेव संशयकोटिता, यथा–स्थाणुत्वपुरुषत्वयोः, इह च कथञ्चित्सत्त्वस्य प्रसिद्धत्वेपि सर्वथा[ऽ]सत्त्वस्य कुत्राप्यप्रसिद्धतया कथं संशयकोटित्वम्?–इति चेन्न । वस्तुतो[ऽ]प्रसिद्धस्यापि

---

(१) इदंच भावद्वयकोटिक संशयांगीकाराभिप्रायेण । भवतिहि भूतलं जलव दग्निमद्वेति । अतएव स्थाणुर्वा पुरुषोवेति स्थाणुत्व पुरुषत्व कोटिक स्संशयो प्युपपद्यते । एवंच कथंचित्सत्त्वस्य किंचित्प्रकारावच्छिन्न सत्त्वरूपस्य सर्वथा सत्त्वस्य सर्वप्रकारावच्छिन्न सत्त्वरूपस्यच कोटित्वसम्भवा त्तदुभयकोटिक संशयोपपत्तिः। यदिच सर्वथा भावद्वयकोटिक संशयो नास्त्येव, तदा सर्वथा सत्त्वस्य किंचिदवच्छिन्न सत्त्वाभावरूपत्वांगीकारेण कथंचि त्संशय निर्वाहः कार्यः । ग्रन्थकारस्त्वयं सर्वथा सत्त्वस्य सर्वप्रकारावच्छिन्न सत्त्वरूपतां वदन् भावद्वयकोटिकमेव संशय मभिप्रयाय ।

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

प्रसिद्धत्वेन इ तस्य संशयविषयत्वसम्भवात । घटत्वावच्छिन्नसत्त्वस्यैकं कोटित्वं सर्वप्रकारावच्छिन्नत्वप्रकारेण सत्त्वस्य चापरं कोटित्वमिति वस्तुत स्सत्त्वे सर्वप्रकारावच्छिन्नत्वस्यासत्त्वेपि नक्षतिः । एवंद्वितीयादिसंश य प्रकारा अप्यूह्याः । निरुक्तसंशयेनच घटे वास्तवसत्त्वनिर्णय स्सम्पादनीय इति जिज्ञासोत्पद्यते ; जिज्ञासांप्रति संशयस्य कारण त्वात ताद्दशजिज्ञासया घटः किंस्यादस्त्येवेति प्रश्नः, प्रश्नेच जिज्ञा त्राया हेतुत्वात । ताद्दशप्रश्नज्ञानाच्च प्रतिपादकस्य प्रतिपिपादयिषाजायते । प्रतिपिपादयिषयाचोत्तरम् । इत्युक्तप्रणाल्या धर्मसप्तविधत्व धीनं भंगानां सप्तविधत्वमिति बोधयितुं सत्यन्तनिवेश इतिध्येय म् ।

तदु क्तम् ;-

" भङ्गास्सत्त्वादयस्सप्त संशयास्सप्ततद्गताः ।
जिज्ञासास्सप्त सप्तस्युः प्रश्नास्सप्तोत्तराण्यपि ॥ " – इति ॥

नन्वि दं सर्वं तदोपपद्यते, यदिधर्माणां सप्तविधत्वमेवेति सिद्धंस्यात ; तदे व नसंभवति । प्रथमद्वितीयधर्मव त्प्रथमतृतीयादि धर्माणां क्र क्रमार्पितानां धर्मान्तरत्वसिद्धे स्सप्तविधधर्म नियमाभावात; इति चे न्न ।

क्रमा क्रमार्पितयोः प्रथमतृतीयधर्मयो धर्मान्तरत्वेना प्रतीतेः । स्यादस्तिघट : इत्यादौ घटत्वावच्छिन्न सत्त्वद्वयस्यासम्भवात , मृण्मयत्वाद्यवच्छि न्न सत्त्वान्तरस्य सम्भवेपि दारुमयत्वाद्यवच्छिन्नस्यापरस्य सत्त्व स्यापि सम्भवेना परधर्मसप्तकासिद्धे स्सप्तभंग्यन्तरस्यैवसम्भवात् ।

एतेन द्वितीय तृतीय धर्मयोः क्रमाक्रमार्पितयो धर्मान्तरत्व मिति निरस्त । एकरूपावच्छिन्न नास्तित्वद्वयस्यासम्भवात ।

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

ननु नन्वेवं – प्रथमचतुर्थयो द्वितीयचतुर्थयो स्तृतीयचतुर्थयोश्च सहितयोः कथं धर्मान्तरत्वम् , अवक्तव्यत्वंहि सहार्पितास्तित्वनास्तित्वोभयम् , तथाच यथा क्रमार्पितास्तित्वोभयस्मि न्नस्तित्वस्य योजनं न सम्भवति , अस्तित्वद्वयाभावात ; तथा सहार्पितोभयस्मि न्नपीति-चेन्न । यतो ऽवक्तव्यत्वं सहार्पितोभयमेव न , किन्तु, सहार्पितयो रस्तित्वनास्तित्वयो स्सर्वथा वक्तुमशक्यत्वरूपं धर्मान्तरमेव तथाच सत्वेनसहित मवक्तव्यत्वादिकं धर्मान्तरं प्रतीतिसिद्धमेव ।

प्रथमेभंगे सत्त्वस्य प्रधानभावेन प्रतीतिः, द्वितीयेपुनरसत्त्व-स्य, तृतीये क्रमार्पितयो स्सत्त्वासत्त्वयोः , चतुर्थेत्ववक्तव्यत्वस्य, प-ञ्चमे सत्त्वविशिष्टावक्तव्यत्वस्य , षष्ठेचा सत्त्वविशिष्टावक्तव्यत्वस्य, स-प्तमे क्रमार्पितसत्त्वासत्त्वविशिष्टा वक्तव्यत्वस्ये, तिविवेकः । प्रथ-मभंगादा वसत्त्वादीनां गुणभावमात्रं, नतु प्रतिषेधः।

ननु - अवक्तव्यत्वं यदिधर्मान्तरं तर्हिवक्तव्यत्वमपि धर्मान्तरं-प्राप्नोति , कथं सप्तविधएव धर्मः ? तथाचाष्टमस्य वक्तव्यत्व धर्मस्य सद्भावेन तेन सहा ष्टभंगीस्यात् , न सप्तभंगी;-इतिचन्न ।

सामान्येन वक्तव्यत्वस्या तिरिक्तस्या भावात । सत्त्वादिरूपेण व-क्तव्यत्वंतु प्रथमभंगादावे वान्तर्भूतम् । अस्तुवा वक्तव्यत्वंनाम कश्च-न धर्मोऽतिरिक्तः , तथापि वक्तव्यत्वावक्तव्यत्वाभ्यां विधिप्रतिषेधक-ल्पनाविषयाभ्यां सत्त्वासत्त्वाभ्यामिव सप्तभंग्यन्तरमेव प्राप्नोतीति-न सत्त्वासत्त्व प्रमुख सप्तविध धर्मव्याघातः । तथाच धर्माणां-सप्तविधत्वा त्तद्विषयसंशयादीनामपि सप्तविधत्वमिति सप्तभंग्या अ-धिकसंख्याव्यवच्छेद सिद्धः।

नन्ववंरीत्याऽधिकसंख्याव्यवच्छेदेपि न्यूनसंख्याव्यवच्छेदः कथं सिद्ध्यति ? तथाहि - यदिघटादा वस्तित्वप्रमुखा स्सप्त धर्माः प्रामाणिका स्स्युः , तदा तद्विषयसंशयातिक्रमेण सप्तभंगी सिद्ध्येत्

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

तदेव न, सत्त्वासत्त्वयो भेदाभावात्। यत्स्वरूपेण सत्त्वं तदेव पररूपेणा सत्त्वं। तथाच न प्रथमद्वितीयभंगौ घटेते। तयो रन्यतरेणैव गतार्थत्वात्। एवंच तृतीयादिभंगाभावा त्कुतस्सप्तभंगी? – इतिचेत्।

अत्रोच्यते। स्वरूपाद्यवच्छिन्नं सत्त्वम्, पररूपाद्यवच्छिन्नमसत्त्वमि त्यवच्छेदकभेदा त्तयो र्भेदसिद्धेः। अन्यथा स्वरूपेणेव पररूपेणापि सत्त्वप्रसंगात्। पररूपेणेव स्वरूपेणा प्यसत्त्वप्रसंगाच्च।

किंच सत्त्वं हि वृत्तिमत्त्वं, भूतले घटोस्तीत्यादौ भूतलनिरूपित वृत्तित्ववान्घटइति बोधात्। असत्त्वंचा भावप्रतियोगित्वम्,भूतलेघटोनास्तीत्यादौ भूतलनिष्ठाभावप्रतियोगी घट इतिबोधात्। तथाचसत्त्वासत्त्वयो स्स्वरूपभेदोऽक्षतएव।

अपिच-(१) ये त्रिरूपं हेतु मिच्छन्ति सौगतादयः। येवा (२) पञ्चरूप मिच्छन्ति नैयायिकादयः, तेषामुभयेषामपि हेतो स्सपक्षसत्त्वापेक्षया विपक्षासत्त्वं भिन्नमेवा भिमतं; अन्यथा स्वाभिमतस्य त्रिरूपत्वस्य पंचरूपत्वस्यवा व्याघातात्। – इति।

अथैवमपि कथञ्चि त्सत्त्वापेक्षया क्रमार्पितोभयस्य कोभेदः? नहि प्रत्येकघटपटापेक्षया घटपटोभयंभिन्नम्। – इतिचेन्न;

प्रत्येकापेक्षयो भयस्य भिन्नत्वेन प्रतीतिसिद्धत्वात्। अतएव – प्रत्येक घकार टकारापेक्षया क्रमार्पितोभयरूपं घटपद मतिरिक्त मभ्युपगम्यते सर्वैः प्रवादिभिः। अन्यथा प्रत्येक घकाराद्यपेक्षया घटपदस्याभिन्नत्वे घकाराद्युच्चारणेनैव घटपदज्ञानसम्भवेन घटत्वावच्छि

---

(१) पक्षसत्त्वं सपक्षसत्त्वं विपक्षासत्त्वं चेति हेतो धर्म त्रयमेवसाध्यसाधने ऽलमिति सौगताः।

(२) नैयायिकाःपुन रबाधितत्व मसत्प्रतिपक्षितत्वंचेति रूपद्वयंमेळयित्वा पंचरूपोपपन्नमेव लिंग मित्याहुः।

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

स्रोपस्थितिसम्भवा च्छेषोच्चारण वैयर्थ्य मापद्येत । अ तएव प्रत्येकपुष्पापेक्षया मालायाः कथञ्चिद्भेद स्सर्वानुभवसिद्धः । इत्थंच कथञ्चित्सत्त्वासत्त्वापेक्षया क्रमार्पितोभय मतिरिक्तमेव ।

स्यादेतत् , क्रमार्पितो भयापेक्षया सहार्पितो भयस्य कथम् भेदः ? क्रमाक्रमयो श्शब्दनिष्ठत्वेना र्थनिष्ठत्वाभावात् । नहि घटादौ क्रमार्पितसत्त्वासत्त्वोभयापेक्षया ऽ क्रमार्पितसत्त्व ासत्त्वोभय मतिरिक्त मस्ति । घटपटोभयाधिकरणे भूतले ऽक्रमार्पित घटपटोभय मेकं सहार्पितघटपटोभयंचापरमिति नकेनाप्यनुभूयते ।

अथ क्रमार्पितसत्त्वासत्त्वोभयापेक्षया ऽ क्रमार्पित सत्त्वासत्त्वोभयस्य भेदाभावेपि नक्षतिः । अपुनरुक्त वाक्यसप्तक स्यैव सप्तभंगीपदार्थत्वेन सप्तधा वचनमार्गप्रवृत्ते र्निराबाधत्वात् । सत्त्वासत्त्वधर्मविषयतया सप्तधैव वचनमार्गाः प्रवर्तन्ते नातिरिक्ताः , पुनरुक्तत्वा दित्यत्र सप्तभंगी तात्पर्यात् । स्वजन्यबोधसमानाकार बोधजनक वाक्योत्तरकालीन वाक्यत्वमेवहि पुनरुक्तत्वम् । प्रकृतेच तृतीयचतुर्थयो नेदृशं पौनरुक्त्यं सम्भवति , तृतीयभंग जन्यबोधे-अस्तित्वविशिष्टनास्तित्वस्य प्रकारतया चतुर्थभंगजन्यबोधे चास्तित्वनास्तित्वोभयस्य प्रकारतया तृतीयचतुर्थजन्यबोधयो स्समानाकारत्वविरहात् - इति चेन्न । तथास त्यधिकभंगस्य दुर्निवारत्वात् । तथाहि - यथा तृतीयचतुर्थयो र्नपौनरुक्त्यं विलक्षणबोधजनकत्वात् । तथा व्युत्क्रमार्पितस्य , स्यान्नास्ति चास्तिचेति भंगस्य नास्त्यस्तित्वसहिता वक्तव्यत्वप्रतिपादक भंगान्तरस्यच नतृतीयसप्तमाभ्यां पौनरुक्त्यम् । अस्तित्वविशिष्टनास्तित्वप्रकारकबोधस्य तृतीयेन जननात , व्युत्क्रमप्रयुक्तेन, नास्तित्वसहितास्तित्वप्रकारकबोधस्य; जननाच्च विशेषणविशेष्यभावे वैपरीत्येन तादृशबोधयो स्समानाकारत्वाभावात् । एवं सप्तमेनापि व्युत्क्रमार्पि-

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

तोभयसहितावक्तव्यत्वप्रतिपादक भंगस्येति नवभंगी प्राप्नोति। इति चेत्।

अत्राहुः। तृतीये ऽस्तित्व नास्तित्वोभयस्य प्रधानत्वम्। चतुर्थेचा वक्तव्यत्वरूप धर्मान्तरस्येति न तयो रभेदशंका। अवक्तव्यत्वंचा स्तित्व नास्तित्व विलक्षणम्। नहि सत्त्वमेव वस्तुनस्स्वरूपं, स्वरूपादिभि स्सत्वस्येव पररूपादिभि रसत्त्वस्यापि प्रतिपत्तेः। नाप्यसत्त्वमेव। स्वरूपादिभि स्सत्त्वस्यापि प्रतीति सिद्धत्वात्। नापि तदुभयमेव, तदुभयविलक्षणस्यापि जात्यन्तरस्य वस्तुनो नुभूयमानत्वात्। यथा - दधिगुड (१) चातुर्जातकादि द्रव्योद्भवं पानकंहि केवलदधिगुडाद्यपेक्षया जात्यन्तरत्वेन पानकमिदं सुस्वादु सुरभीति प्रतीयते। नचोभय विलक्षणत्वमेववस्तुन स्स्वरूपमिति वाच्यम्; वस्तुनि कथंचित्सत्त्वस्य कथंचि दसत्त्वस्यच प्रतीतेः। दधिगुड चातुर्जातकाद्युद्भवे पानके दध्यादि प्रतिपत्तिवत्। एवमुत्तरत्रापि बोध्यम्। तथाच विविक्तस्वभावानां सप्तधर्माणां सिद्धे स्तद्विषय संशयजिज्ञासादि क्रमेण सप्तप्रतिवचनरूपा सप्तभंगी सिद्धेति॥

इयंच सप्तभंगी द्विविधा - प्रमाणसप्तभंगी नयसप्तभंगीचेति। किंपुनः प्रमाणवाक्यम्, किंवा नयवाक्यमिति चेत?

अत्र केचित; - सकलादेशः प्रमाणवाक्यं, विकलादेशो नयवाक्यम्. अनेकधर्मात्मक वस्तुविषयक बोधजनक वाक्यत्वं सकलादेशत्वं, एकधर्मात्मकवस्तुविषयक बोधजनकवाक्यत्वं विकलादेशत्वं इत्याहुः।

---

(१) लवंगत्वक्, पत्रकं, नागकेसरः, एलाचेति चतुर्णां वस्तूनां चातुर्जातकमितिनाम। ' सकेसरं चतुर्जातं त्वक्पत्रैल न्त्रिजातक " मि त्यष्टांगहृदये।

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

तेषां प्रमाणवाक्यानां नयवाक्यानांच सप्तविधत्व व्याघातः । प्रथमद्वितीय चतुर्थभङ्गानां सत्त्वासत्त्वावक्तव्यत्वरूपै कैक धर्मात्मक- वस्तुविषयक बोधजनकानां सर्वथा विकलादेशत्वेन नयवाक्यत्वापत्तेः तृतीय पंचम षष्ठ सप्तमाना मनेकधर्मात्मकवस्तुविषयक बोधजनका- नां सदा सकलादेशत्वेन प्रमाणवाक्यतापत्तेः । नच त्रीण्येव नय- वाक्यानि चत्वार्येव प्रमाणवाक्यानीति वक्तुं युक्तं । सिद्धान्त- विरोधात् ।

यत्तु धर्माविषयक धर्मिविषयक बोधजनकवाक्यत्वं सकलादेश- त्वं, धर्म्यविषयक धर्मविषयक बोधजनकवाक्यत्वम् विकलादेशत्व- मिति - तन्न । -सत्त्वाद्यन्यतमेनापि धर्मेणा विशेषितस्य धर्मिण श्शा ब्दबोध विषयत्वासम्भवात , धर्मिवृत्तित्वा विशेषितस्य धर्मस्यापि तथात्वा दुक्तलक्षणस्या सम्भवात् ।

नच-स्याज्जीव एवे त्यनेन धर्मिमात्रविषयकबोधस्य जनना त्स्याद् स्त्येवेत्यनेन केवलधर्मविषयकबोधस्य जननाच्च नासम्भवइति वाच्यं ; यतो जीवशब्देन जीवत्वरूप धर्मावच्छिन्नस्यैव जीवस्याभिधानम् - नतु केवलधर्मिणः, अस्तिशब्देन च यत्किञ्चिद्धर्मिवृत्तित्व विशेषित- स्यैवा स्तित्वस्याभिधानम् - नतु केवल धर्मस्ये, ति सर्वानुभव- साक्षिकम् ।

नचैवं - द्रव्यशब्दस्य भावशब्दस्यच विभागानुपपत्तिरितिवा- च्यम्;-यतो मुख्यतया द्रव्यप्रतिपादकश्शब्दो द्रव्यशब्दः, यथा जीव शब्दः, जीवशब्देनहि जीवत्वरूप धर्मो गौणतया प्रतिपाद्यते - जीवद्र व्यं मुख्यतया । एवं - मुख्यतया धर्मप्रतिपादकश्शब्दो भावशब्दः, यथा - अस्त्यादिशब्दः , तेनहि - अस्तित्वरूप धर्मस्य मुख्यतया प्र- तिपादनम् , धर्मिणश्च गौणतया । इति द्रव्यभावशब्दयो विभाग उपपद्यत इति ॥

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

यद्यपि - पाचकोऽयमिति द्रव्यशब्दः, पाचकत्वमस्येति भावशब्दः, इति द्रव्यभावशब्दयो विभाग निरूपणम्; तदपि न संगच्छते। पाचकशब्देनापि पाचकत्वधर्म विशिष्टस्यैव पुरुषस्याभिधानात्; पाचकत्वमित्यनेनापि पाचकवृत्तित्व विशेषितस्यैव धर्मस्य बोधनात्; - इति॥

अपरेतु - स्यादस्तीत्यादिवाक्यं सप्तविधमपि प्रत्येकं विकलादेशः; समुदितं सकलादेशः; - इतिवदन्ति।

अत्र चिन्त्यते - कुत स्स्यादस्तीत्यादिवाक्यम् प्रत्येकम् विकलादेशः?

ननु - सकलार्थ प्रतिपादकत्त्वाभावा द्विकलादेश इति चेन्न। - तादृशवाक्यसप्तकस्यापि विकलादेशत्वापत्तेः, समुदितस्यापि सदादिवाक्यसप्तकस्य सकलार्थ प्रतिपादकत्वाभावात; सकलश्रुतस्यैव सकलार्थ प्रतिपादकत्वात्।

एतेन - सकलार्थ प्रतिपादकत्वा त्सप्तभंगीवाक्यम् समुदितं सकलादेशः, इतिनिरस्तम्; समुदितस्यापि तस्य सकलार्थप्रतिपादकत्वासिद्धेः, सदादिसप्तवाक्येन एकानेकादि सप्तवाक्यप्रतिपाद्य धर्माणा मप्रतिपादनात्।

सिद्धान्तविदस्तु "एकधर्मबोधन मुखेन तदात्मकानेकाशेष धर्मात्मक वस्तुविषयक बोधजनकवाक्यत्वम् सकलादेशत्वम्। तदुक्तम्।

'एकगुणमुखेना शेषवस्तु रूपसंग्रहा त्सकलादेशः' इति।

तस्यार्थः - यदा - अभिन्नंवस्तु एकगुणरूपेणोच्यते। गुणिनां गुणरूपमन्तरेण विशेषप्रतिपत्ते रसम्भवात; तदासकलादेशः, एको हि जीवो ऽस्तित्वादि ष्वेकस्य गुणस्य रूपेण अभेदवृत्त्या, अभेदोपचारेणवा, निरंश स्समस्तो वक्तु मिष्यते, विभागनिमित्तस्य तत्प्रतियोगिनो गुणान्तरस्या विवक्षितत्वात्। कथमभेदवृत्तिः? कथं वा ऽभेदोपचारः? इतिचेत्। द्रव्यार्थत्वेनाश्रयणे तद्व्यतिरेका दभेदवृ-

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

त्तिः, पर्यायार्थत्वेनाश्रयणे परस्परव्यतिरेके प्येकत्वाध्यारोपा दभेदोपचारः । इति । अभेदवृत्त्यभेदोपचारयोरनाश्रयणे - एकधर्मात्मकवस्तुविषयबोधाजनकं वाक्यं विकलादेशः" । इतिप्राहुः ॥

तत्र धर्मान्तराप्रतिषेधकत्वे सति विधिविषयकबोधजनकवाक्यं प्रथमो भङ्गः । सच स्या दस्त्येव घट इति वचनरूपः । धर्मान्तराप्रतिषेधकत्वे सति प्रतिषेधविषयक बोधजनकवाक्यं द्वितीयो भङ्गः । सच स्या न्नास्त्येव घट इत्याकारः तत्र प्रथमवाक्ये घटशब्दो द्रव्यवाचकः, विशेष्यत्वात । अस्तीति गुणवाचकः, विशेषणत्वात ।

ननु - घटस्य रूपम् । फलस्य माधुर्यम् । पुष्पस्य गन्धः । जलस्य शैत्यम् । वायोः स्पर्शः । इत्यादौ गुणस्यापि विशेष्यत्वं दृश्यते ; द्रव्यस्यापि विशेषणत्वं ; इति चेत्सत्यम् । तथापि - समानाधिकरणवाक्ये - नीलमुत्पलं, शुक्लः पटः, सुरभि र्वायुः, इत्यादौ द्रव्यवाचकस्यैव विशेष्यत्वं गुणवाचकस्यैव विशेषणत्व मिति नियमात ॥

तत्र स्वरूपादिभि रस्तित्व मिव नास्तित्वमपि स्या दित्यनिष्टार्थस्य निवृत्तये स्या दस्त्येवेत्येवकारः । तेनच स्वरूपादिभि रस्तित्वमेव न नास्तित्व मित्यवधार्यते । तदुक्तम् -

" वाक्ये ऽवधारणं ताव दनिष्टार्थनिवृत्तये ।
कर्तव्य मन्यथा नुक्त समत्वा त्तस्य कुत्रचित् ॥ " इति ॥

ननु नानार्थस्थले गौरेवेत्यादौ सत्य प्यवधारणे ऽनिष्टार्थनिवृत्ते रभावात , गा मानयेत्यादा वसत्य प्यवधारणे प्रकरणादिना निष्टार्थनिवृत्ते र्भावाच्च , नावधारणाधीना ऽन्यनिवृत्तिः । किञ्च - अन्यनिवृत्तिं कुर्व न्नेवकार एवकारान्तर मपेक्षतेवा ? नवा ? । आद्ये ऽनवस्थापत्तिः । द्वितीये यथै वकारप्रयोग एवकारान्तराभावेपि प्रकरणादिना ऽन्यनिवृत्ति र्लभ्यते । तथा सर्वशब्दप्रयोगेपि प्रक-

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

रणादिना ऽन्यनिवृत्ते र्लाभसम्भवा देवकारप्रयोगो ऽनर्थकइति ॥

मैवम् । यत श्शब्दाम्नायपरिपाटी विरुद्ध्यते । तत्रहि ये शब्दा स्स्वार्थमात्रे ऽनवधारिते संकेतिता स्ते तदवधारणविवक्षाया मेवकार मपेक्षन्ते । तत्समुच्चयादिविवक्षायां चकारम् । यथा – घटमेवानय, घटं चानय, इति । य स्त्ववधारणे संकेतित स्तस्यच ना वधारणबोधन एवकारान्तरापेक्षा । यथा चकारस्य समुच्चयबोधने न चकारान्तरापेक्षा ॥

नच – निपातानां द्योतकत्वा देवकारस्य वाचकत्वं न सम्भवतीति वाच्यम् । निपातानां द्योतकत्वपक्षस्य वाचकत्वपक्षस्यच शास्त्रे प्रदर्शनात् । " द्योतका श्च भवन्ति निपाताः " इत्यत्र 'चशब्दा द्वाचकाश्च' इति व्याख्यानात् ॥

परेतु – "निपातानां द्योतकतया न द्योतकस्य द्योतकान्तरापेक्षे त्यवधारणद्योतने नैवकार स्यैवकारान्तरा पेक्षा ; यथा प्रदीपस्य न प्रदीपान्तरापेक्षा, वाचकस्यच घटादिपदस्य युक्ता ऽवधारणबोधनार्थे वकारापेक्षा , ननु – द्योतकस्यापि द्योतकान्तरापेक्षा दृश्यते, एव मेवेत्यादौ - एवमिति मान्तनिपात स्यैवकारापेक्षणात् ; तथाच सर्वोपि द्योतको द्योत्यार्थे द्योतकान्तरापेक्ष स्स्यादि त्यनवस्था दुर्निवारेति चे न्न, तत्र एवंशब्दस्य स्वार्थवाचकत्वा दन्यनिवृत्तौ द्योतकापेक्षोपपत्तेः, निपातानां वाचकत्वस्यापि शास्त्रसम्मतत्वात्, अतएव – उपकुंभ मित्यादा वुपशब्देन कुंभशब्दस्य समास स्संगच्छते, अन्यथा - उपशब्दस्य द्योतकत्वेन समासो नस्यात्, द्योतकेन समासासम्भवात " इत्याहुः ॥

अत्र सौगताः– 'सर्वशब्दाना मन्यव्यावृत्तिवाचकत्वात् घटादिपदै रेव घटेतरव्यावृत्तिबोधना न्न तदर्थ मवधारणम् युक्तम्' इति वदन्ति ।

तन्न; – घटादिशब्दा द्विधिरूपतया र्थबोधस्या नुभवसिद्ध त्वात् । यदिच शब्दा द्विधिरूपतया र्थबोधो ना नुभवसिद्ध इति

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

मन्यते । तदा कथ मन्यव्यावृत्तिशब्दो विधिरूपेणा न्यव्यावृत्तिं बो धयति । नच - अन्यव्यावृत्तेरपि तदितरव्यावृत्तिरूपेणैवा न्य व्यावृत्तिशब्दा द्बोधइति वाच्यम् । तथा सति तदन्यव्यावृत्ते रपि तदितरव्यावृत्तिरूपेण बोधस्य वक्तव्यतया ऽ नवस्थापत्तेरिति । तथाच ' वाक्ये ऽवधारणं ताव दनिष्टार्थनिवृत्तये ' इति सिद्धम् ॥

अयं चैवकारास्त्रिविधः , अयोगव्यवच्छेद बोधकः अन्ययोग व्यवच्छेद बोधकः अत्यन्ता योग व्यवच्छेद बोधकश्च । इति ।

तत्र विशेषणसंगतैवकारो ऽयोगव्यवच्छेद बोधकः , यथा - शंखः पाण्डरएवेति । अयोगव्यवच्छेदो नाम - उद्देश्यतावच्छेदक समानाधिकरणा भावा प्रतियोगित्वं । प्रकृतेचो द्देश्यतावच्छेदकं शंखत्वं , शंखत्वावच्छिन्न मुद्दिश्य पाण्डरत्वस्य विधानात , तथा-च - शंखत्वसमानाधिकरणो योऽत्यन्ताभावः, न ताव त्पाण्डरत्वा-भावः , किन्त्वन्याभावः , तत्प्रतियोगित्वं पाण्डरत्वे वर्तत इति शंखत्वसमानाधिकरणाभावाप्रतियोगिपाण्डरत्ववान् शंख इ त्युक्त स्थ-ले बोधः ।

विशेष्य संगतैव कारो ऽन्ययोगव्यवच्छेदबोधकः । यथा - पार्थएव धनुर्धरइति । अन्ययोगव्यवच्छेदो नाम विशेष्यभिन्नतादात्म्यादि व्यवच्छेदः । तत्रैवकारेण पार्थान्य तादात्म्याभावो धनुर्धरे बो-ध्यते । तथाच पार्थान्य तादात्म्याभावव द्धनुर्धराभिन्नः पार्थ इतिबोधः ॥

क्रियासंगतैवकारो त्यन्तायोग व्यवच्छेदबोधकः , यथा - नीलं सरोजं भवत्ये वेति । अत्यन्तायोगव्यवच्छेदो नाम - उद्देश्य तावच्छेदक व्यापकाभावा प्रतियोगित्वं । प्रकृतेचो द्देश्यतावच्छेद कं सरोजत्वम् , तद्धर्मावच्छिन्ने नीलाभेदरूप धात्वर्थस्य विधा नात् । सरोजत्वव्यापको योऽत्यन्ताभावः, न ताव न्नीलाभेदा भावः, कस्मिंश्चित्सरोजे नीलाभेदस्यापि सत्त्वात् , अपि त्वन्याभावः, त-

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

दप्रतियोगित्वं नीलाभेदे वर्तत इति सरोजत्वव्यापकात्यन्ताभावा प्रतियोगि नीलाभेदव त्सरोज मि त्युक्तस्थले बोधः।

नन्वेवं - स्यादस्त्येव घट इत्यादा वत्यन्तायोग व्यवच्छेदबोधके नैव कारेण भवितव्यम्, क्रियासंगतत्वात्; एवंच विवक्षिता र्थासिद्धिः, कस्मिन्श्चिद्घटे ऽस्तित्वस्याभावेपि तादृशप्रयोग सम्भवात्। यथा कस्मिन्श्चित्सरोजे नीलत्वस्या भावेपि नीलसरोजं भवत्येवेति प्रयोगः। इति चेन्न। -- प्रकृते ऽयोगव्यवच्छेद बोधकस्यै वैवकारस्य स्वीकृतत्वात, क्रियासंगत स्यैवकारस्यापि क्वचि दयोगव्यवच्छेद बोधकत्व दर्शनात। यथा - ज्ञानमर्थं गृह्णात्येवेत्यादौ ज्ञानत्वसमानाधिकरणा त्यन्ताभावा प्रतियोगित्वस्या र्थग्राहकत्वे धात्वर्थे बोधः। तत्राप्य त्यन्तायोग व्यवच्छेदबोधस्योपगमे ज्ञानमर्थं गृह्णात्येवेतिव ज्ज्ञानं रजतं गृह्णात्येवेति प्रयोगप्रसंगः। सकलज्ञानेषु रजतग्राहकत्वस्याभावेपि यत्किंचिज्ज्ञाने रजतग्राहकत्व सत्त्वेनैव ज्ञानं रजतं गृह्णात्येवे त्यत्यन्ता योगव्यवच्छेद बोधकैवकारप्रयोगस्य निर्बाधत्वात। तद्व त्प्रकृते क्रियासंगतोऽप्ययोगव्यवच्छेद बोधक एवकारः। स्यादस्त्येवघट इत्यादौ घटत्वसमानाधिकरणात्यन्ताभावा प्रतियोगित्वस्यै वकारार्थस्य धात्वर्थे ऽस्तित्वेन्वयेन घटत्वसमानाधिकरणो त्यन्ताभावाप्रतियो ग्यस्तित्ववान् घट इति बोधः। घटत्वसमानाधिकरणो योत्यन्ताभावः, न ताव दस्तित्वा त्यन्ता भावः, किन्त्वन्याभावः, तदप्रतियोगित्वस्या स्तित्वे सत्वात॥

अथ - घटत्वसमानाधिकरणो योऽत्यन्ताभाव इत्युक्ते ऽस्तित्वात्यन्ताभावोपि भवितु मर्हति, अस्तित्वात्यन्ताभावस्य नास्तित्वस्य घटे सत्त्वात; तादृशाभावाप्रतियोगित्वंचा स्तित्वे बाधितं, इति निरुक्तवाक्येना स्तित्वाभावस्य नास्तित्वस्य घटे निषेधः प्राप्नोतीति चेत्। - उच्यते, प्रतियोगिव्यधिकरणाभावा प्रतियो-

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

गित्व मेवकारार्थः, तादृशाभावे - उद्देश्यतावच्छेदक सामानाधिकरण्यंचो द्देश्यबोधकपद समभिव्याहार लभ्यम् । शंखः पाण्डर एवेत्यादौ प्रतियोगिव्यधिकरणाभावा प्रतियोगित्वरूपे वकारार्थैकदेशे ऽभावे शंखत्वसामानाधिकरण्यस्य शंखपद समभिव्याहार लभ्यत्वात् । एवंच प्रकृते प्येवकारार्थः प्रतियोगिव्यधिकरणाभावा प्रतियोगित्वं , अभावे घटत्वसामानाधिकरण्यन्तु घटपद समभिव्याहारलभ्यं । तथाच घटत्वसमानाधिकरणः प्रतियोगि व्यधिकरणो योऽभावः, न ताव दस्तित्वाभावरूपं नास्तित्वं, तस्य प्रतियोगिना ऽस्तित्वेन समानाधिकरणत्वात । किन्त्वन्याभावः , तद प्रतियोगित्वं चास्तित्वे निर्बाधमिति ॥

अत्र प्रतियोगि वैयधिकरण्याप्रवेशे पूर्वोक्तरीत्या सर्वप्रकारेणाप्यास्तित्वप्रसक्त्या नास्तित्वनिषेधे प्राप्ते ऽस्तित्वैकान्त्यनिवृत्तिपूर्वक मनैकान्त्यद्योतनाय स्यात्कारः । स्यात्कारप्रयोगाधीनमेवैवकारार्थे प्रतियोगि वैयधिकरण्यं पूर्वं प्रवेशितम् ।

स्याच्छब्दस्य चानेकान्त विधिविचारादिषु बहुष्वर्थेषु सम्भवत्सु इहविवक्षावशा दनेकान्तार्थो गृह्यते । अनेकान्तत्वं नामानेक धर्मात्मकत्वं । अन्तशब्दस्य घटादा वभेदेना न्वयः । तथाचानेक धर्मात्मको घट स्तादृशास्तित्ववा निति बोधः ।

नच-स्याच्छब्देनैवा नेकान्तस्य बोधने ऽस्त्यादिवचन मनर्थकमिति-वाच्यम् । स्याच्छब्देन सामान्यतोऽनेकान्तबोधनेपि विशेषरूपेणबोधनाया स्त्यादिशब्दप्रयोगात् ॥

तदुक्तम् -

" स्या च्छब्दा दप्यनेकान्त सामान्यस्या वबोधने ।
शब्दान्तरप्रयोगोत्र विशेषप्रतिपत्तये ॥ " इति ॥

यथा - वृक्षोन्यग्रोधः , इति वृक्षत्वेन रूपेण न्यग्रोधस्य बोधनेपि न्यग्रोधत्वेन रूपेण न्यग्रोधबोधनाय न्यग्रोधपदप्रयोगः ।

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

स्या च्छब्दस्य द्योतकत्वपक्षेतु न्यायप्राप्तएवा स्त्यादिप्रयोगः। अस्त्यादिशब्दे नोक्तस्या नेकान्तस्य स्या च्छब्देन द्योतनात। स्या च्छब्दाप्रयोगे सर्वथैकान्तव्यवच्छेदेना नेकांतप्रतिपत्ते रसम्भवात्, एवकारावचने विवक्षितार्था प्रतिपत्तिवत्।

न न्वप्रयुक्तोऽपि स्या च्छब्दो वस्तुनोऽनेकांतस्वरूपत्वसामर्थ्या त्प्रतीयते, सर्वत्रैवकारवत्, इति चे त्सत्यं; प्रतिपाद्यानां स्याद्वादन्यायकौशलाभावे वस्तुसामर्थ्या त्तदप्रतीत्या तेषां प्रतिपत्त्यर्थं तदावश्यकत्वात्। प्रतिपाद्यानां स्याद्वादकौशलेच स्या त्कारा प्रयोग इष्टएव। प्रमाणादिना ऽनेकान्तात्मके समस्तवस्तुनि सिद्धे कुशलाना मस्ति घट इति प्रयोगेपि स्या दस्त्येव घट इति प्रतिपत्तिसम्भवात्।

तदुक्तम्-

"सोऽप्रयुक्तोपि वा तज्ज्ञै स्सर्वत्रार्थात्प्रतीयते।
यथैवकारोऽयोगादि व्यवच्छेदप्रयोजनः॥ इति॥"

ननु योस्तिघटादि स्स सर्वोपि स्वायत्तद्रव्यक्षेत्रकालभावैः, नेतरैः; तेषा मप्रस्तुतत्वादेव निरासम्भवात; तथाच स्यात्कारप्रयोगो व्यर्थ इतिचे त्सत्यम्। सतु तादृशोऽर्थ श्शब्दा त्प्रतीयमानः किंदृशा त्प्रतीयत इति चिन्तायां स्यात्कारः प्रयुज्यते। सच लिङन्त प्रतिरूपको निपातः।

ननु स्याच्छब्दस्य द्योतकत्वपक्षे केनपुनश्शब्देनो क्तोनेकान्तस्स्या च्छब्देन द्योत्यते;- इतिचेत् -

अस्त्येवघट इत्यादिवाक्येना भेद वृत्त्या ऽभेदोपचारेणवा प्रतिपादितोऽनेकान्त स्स्याच्छब्देन द्योत्यतइति ब्रूमः। सकलादेशोहि यौगपद्येना शेषधर्मात्मकं घटादिरूप मर्थं कालादिभि रभेदवृत्त्या ऽभेदोपचारेणवा-

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

प्रतिपादयति , सकलादेशस्य प्रमाणरूपत्वात । विकलादेशस्तु क्रमेण भेदप्राधान्येन भेदोपचारेणवा सुनयैकान्तात्मकं घटादिरूप मर्थं प्रतिपादयति । विकलादेशस्य नयस्वरूपत्वात ।

कः पुनः क्रमः? किंवायौगपद्यम् ? इतिचेदुच्यते । यदातावदस्ति स्वादिधर्माणां कालादिभिर्भेदविवक्षा, तदाऽस्त्यादिरूपैकशब्दस्य नास्ति त्वाद्यनेक धर्मबोधने शक्त्यभावात्क्रमः । यदातु तेषामेव धर्माणां कालादिभि रभेदेन वृत्त मात्मरूप मुच्यते, तदैकेना प्यस्त्यादिशब्देना-स्तित्वादिरूपैकधर्मबोधनमुखेन तदात्मकता मापन्नस्य सकलधर्मस्वरू-पस्य प्रतिपादन सम्भवा द्यौगपद्यम् ॥

केपुनः कालादयः ? इति चेदुच्यते । कालः , आत्मरूपम् , अर्थः, सम्बन्धः , उपकारः , गुणिदेशः, संसर्गः, शब्दः, इति । तत्र स्या दस्त्येव घट इत्यत्र यादृशकालावच्छेदेन घटादा वस्ति-त्वं वर्तते- तत्कालावच्छेदेन शेषानन्तधर्मा अपि घटे वर्तन्त इति तेषा मेककालावच्छिन्नैकाधिकरणनिरूपितवृत्तित्वं कालेना भेदवृत्तिः । यदेवास्तित्वस्य घटगुणत्वं स्वरूपं-तदेवा न्या नन्तगुणानामपि स्वरू-पमि त्येकस्वरूपत्व मात्मरूपेणा भेदवृत्तिः । यएवच घटद्रव्यरूपो र्थो स्तित्वस्या धार सएवा न्यधर्माणाम प्याधारइ त्येकाधारवृत्तित्व मर्थेना भेदवृत्तिः । यएवचा विष्वग्भावः कथंचि त्तादात्म्यलक्षणो स्तित्वस्य सम्बन्ध स्सएवानन्तधर्माणामपी त्येकसम्बन्धप्रतियोगित्वं सम्बन्धेना भेदवृत्तिः । यएवचोपकारो स्तित्वस्य स्वानुरक्तत्व-करणम्-(१) तच्च स्ववैशिष्ट्यसम्पादनं, यथा- नीलरक्तादि

---

(१) एककार्यजनकत्व मुपकारेणा भेदवृत्तिः । अस्तित्वेन घ स्वानुरक्तत्वकरणरूपं कार्यं क्रियते, तदेव नास्तित्वादिभिरपि क्रियतइ त्येककार्यजनकत्वं मुपपन्नम् । स्वानुरक्तत्वकरणं च स्व

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

गुणानां नीलरक्ताद्युपरंजनं नीलरक्तत्वादिगुणवैशिष्ट्यसम्पादनमेव तदपि स्वप्रकारकधर्मिविशेष्यक ज्ञानजनकत्वपर्यवसन्नम् , अस्तित्वस्य स्वानुरक्तत्वकरणंहि अस्तित्वप्रकारक घटविशेष्यकज्ञानजनकत्वम् , तादृशोपकारएव नास्तित्वादिभि रशेषधर्मैः क्रियत इत्येककार्यजनकत्व मुपकारेणा भेदवृत्तिः । यद्देशावच्छेदेन घटादावस्तित्वं वर्तते- तद्देशावच्छेदेनैव घटे नास्तित्वादिधर्माः , ननु कण्ठावच्छेदेना स्तित्वं - पृष्ठावच्छेदेन नास्तित्वमिति देशभेदः , इत्येकदेशावच्छिन्नवृत्तित्वं गुणिदेशेना भेदवृत्तिः । यएव चैकवस्त्वात्मना स्तित्वस्य संसर्ग स्सएवा परधर्माणामपी त्येकसंसर्गप्रतियोगित्वं संसर्गेणा भेदवृत्तिः ॥ ननु - सम्बन्धसंसर्गयोः को विशेषः? इतिचे दुच्यते । कथंचि त्तादात्म्यलक्षणे सम्बन्धे ऽभेदः प्रधानं भेदो गौणः, संसर्गेतु भेदः प्रधान मभेदो गौणः, इति विशेषः । कथंचि त्तादात्म्यंहि कथंचि द्भेदाभेदोभयरूपम् । तत्र भेदविशिष्टाभेद स्सम्बन्ध इत्युच्यते । अभेदविशिष्टभेदश्च संसर्ग इत्यु-

---

वैशिष्ट्यसम्पादनरूपम् । नीलादिगुणै घटादिषु क्रियमाणस्य स्वानुरंजनरूपस्य स्वानुरक्तत्वकरणस्य नीलादिगुणवैशिष्ट्यसम्पादनरूपतादर्शनात । स्ववैशिष्ट्यसम्पादनमपि स्वप्रकारकधर्मिविशेष्यक ज्ञानजनकत्वरूपं पर्यवस्यति । घटादिषु क्रियमाणस्य नीलादिगुणवैशिष्ट्यसम्पादनस्य घटादिविशेष्यक नीलादिगुणप्रकारक ज्ञानजनकत्वापेक्षया ऽतिरिक्तत्वादर्शनात । एवंच स्वानुरक्तत्वकरण मन्तत स्स्वप्रकारकधर्मिविशेष्यक ज्ञानजनकत्वरूपमेव निष्पन्नम् । तथाचा स्तित्वेना स्तित्वप्रकारक घटविशेष्यकज्ञानस्येव नास्तित्वेन नास्तित्वप्रकारक घटविशेष्यकज्ञानस्य जनना दस्तित्वनास्तित्वाद्यो स्स्वप्रकारकधर्मिविशेष्यकज्ञानजनकत्वपर्यवसन्न स्वानुरक्तत्वकरण रूपैककार्यजनकत्वा दुपकारेणा भेदवृत्ति रुपपद्यते ॥

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

च्यते । यएवास्तीति शब्दो स्तित्वधर्मात्मकस्य वस्तुनो वाचक स्सएवा शेषानन्त धर्मात्मकस्यापि वस्तुनो वाचकइत्येकशब्द वाच्यत्वं शब्देना भेदवृत्तिः । एवं कालादिभिरष्टविधा ऽभेदवृत्तिः पर्यायार्थिक नयस्य गुणभावे द्रव्यार्थिकनयप्राधान्या दुपपद्यते ।

द्रव्यार्थिकगुणभावे पर्यायार्थिकप्राधान्येतु नेयं गुणाना मभेदवृत्ति स्सम्भवति । तथाहि – तत्र कालेन ताव दभेदवृत्ति नं-सम्भवति, समकाल मेकत्र नानागुणानां परस्परविरुद्धाना मसम्भवात ; प्रतिक्षणं वस्तुनो भेदात। सम्भवे वा तावदाश्रयस्य तावत्प्रकारेण भेदप्रसंगात् ॥ ना प्यात्मरूपेणा भेदवृत्ति स्सम्भवति नाना गुणानां स्वरूपस्य भिन्नत्वात ; स्वरूपाभेदे तेषां परस्परभेदस्य विरोधात् ॥ नाप्यर्थेनाभेदवृत्तिः, स्वाश्रयार्थस्यापि नानात्वात , अन्यथा नानागुणाश्रयं स्यैकत्व विरोधात् ॥ नापि सम्बन्धेना भेदवृत्तिः, सम्बन्धस्यापि सम्बन्धिभेदेन भेददर्शनात ; यथा दण्डदेवदत्त सम्बन्धा दन्य श्छत्रदेवदवदत्त सम्बन्धः ॥ नाप्युपकारेणाभेदः, अनेकगुणैः क्रियमाणस्य चोपकारस्य प्रतिनियत रूपस्या नेकत्वात्; अनेकै रुपकारिभिः क्रियमाणस्यो पकारस्यै कत्व विरोधात ॥ नापि गुणिदेशाभेदः, गुणिदेशस्यापि प्रतिगुणं भेदात , तदभेदे भिन्नार्थगुणानामपि गुणिदेशाभेदप्रसंगात ॥ नापि संसर्गेणाभेदः , संसर्गस्यापि संसर्गिभेदेन भेदात , तदभेदे संसर्गि भेदविरोधात ॥ नापि शब्देनाभेदः , शब्दस्यार्थभेदेन भिन्नत्वात् , सर्वगुणाना मेकशब्दवाच्यतायां सर्वार्थाना मेकशब्द वाच्यता पत्त्या शब्दान्तरवैफल्यापत्तेः ॥ एवं तत्वतो स्तित्वादीना मेकत्र वस्तु न्य भेदवृत्ते रसम्भवेकालादिभि भिन्नानामपि गुणाना मभेदोपचारःक्रियते ।

एवं निरूपिताभ्या मभेदवृ त्त्यभेदोपचाराभ्या मेकेना स्तिनास्त्या दिशब्देनो पात्तस्या शेषधर्मात्मकस्य घटादिवस्तुनः स्यात्कारो द्योतकस्सम्भवतीत्युक्तं । इत्येवं पदार्थोनिरूपितः ॥

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

वाक्यार्थो निरूप्यते । स्यादस्त्येव घटः, स्यान्नास्त्येव घटः, इत्यस्य स्वरूपाद्यवच्छिन्नास्तित्वाश्रयोघटः, पररूपाद्यवच्छिन्न नास्तित्वाश्रयोघटः, इतिच बोधः । घटादिरूपे वस्तुनि स्वरूपादिना सत्त्वम् पररूपादिनाऽसत्त्वञ्चां गीकरणीयम् । अन्यथा वस्तुत्वस्यैव विलयापत्तेः स्वपररूपोपादानापोहन व्यवस्थाप्यांहि वस्तुनो वस्तुत्वम् !

तत्र घटस्य किं स्वरूपम् ? किंवा पररूपम् ? इतिचेत ; – घट इत्यादिबुद्धौ प्रकारतया भासमानो घटपदशक्यतावच्छेदकीभूत सदृशपरिणामलक्षणो यो घटत्वनामको धर्म स्सघटस्य स्वरूपं, पटत्वादिकं पररूपम् । तत्र घटत्वादिरूपेणेव पटत्वादिरूपेणापि घटस्य सत्त्वे घटस्य पटात्मकत्वप्रसंगः, पटत्वादिनेव घटत्वादिना प्यसत्त्वे सर्वथा शून्यत्वापत्तिः, शशविषाणवत् ।

अथवा-नामस्थापनाद्रव्यभावानां मध्ये यो विवक्षित स्तत्स्वरूपं, इतरत्पररूपम् । तत्र विवाक्षितेन रूपेणास्ति अविवक्षितेननास्ति । यदि विवाक्षितेनापि रूपेण नास्ति , तर्हि शशविषाणव दसत्त्वमेव घटस्य प्राप्नोति । यदिचा विवक्षितेनापि रूपेणास्ति, तदा नामादीनां परस्परभेदो नस्यात् ।

अथवा - घटत्वावच्छिन्नेषु मध्ये यादृशघटः परिगृह्यते, तन्निष्ठस्थौल्यादि धर्मः स्वरूपं, इतरघटादिव्यक्तिवृत्ति धर्मएव पररूपम् । तत्र तादृशस्वरूपेणास्ति, पररूपेणनास्ति । स्वरूपेणा प्यस्तित्वानंगीकारेऽसत्त्वप्रसंगः पूर्ववत । एवमग्रेपि । तादृशोघटो यदि निरुक्त पररूपेणाप्यस्ति, तदा सर्वघटाना मैक्यप्रसंगा त्सामान्याश्रय व्यवहार विलोपापत्तिः ।

अथवा – तस्मिन्नेव घटविशेषे कालान्तरावस्थायिनि पूर्वोत्तर कुसूलान्त कपाला द्यवस्थाकलापः पररूपं, तदन्तरालवृत्ति घटपर्याय स्स्वरूपं , तेन रूपेणास्ति । इतररूपेणनास्ति । यदि कु-

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

सूलान्तकपालाद्यात्मनापि घटोस्ति, तदा घटावस्थायां घटपर्यायस्येव कुसूलादिपर्यायस्या प्युपलब्धिप्रसंगः । कुसूलाद्यवस्थायामपि घटसत्त्वे घटपर्यायोत्पत्ति विनाशार्थं गुरुप्रयत्न वैफल्यंच । एवं – अन्तरालवृत्ति घटपर्यायात्मनापि यदि घटो नास्ति, तदा तत्काले जलाहरणादिरूपं तत्कार्यं नोपलभ्येत ।

अथवा – घटादौ प्रतिक्षणं सजातीयपरिणामो जायत इति तात्र सिद्धान्तसिद्धम् । तत्र ऋजुसूत्रनयापेक्षया वर्तमानक्षणवृत्ति घटपर्यायः स्वरूपं, अतीतानागत घटपर्यायएव पररूपं । तत्क्षणवृत्ति स्वभावेन सता घटोस्ति, क्षणान्तरवृत्ति स्वभावेन नास्ति, तथा प्रतीतिः । तत्क्षणवृत्तिस्वभावेनेव क्षणान्तरवृत्ति स्वभावेना प्यस्तित्वे एकक्षणवृत्त्येव सर्वं स्यात । क्षणान्तरवृत्तिस्वभावेन तत्क्षणवृत्ति स्वभावेना प्यस्तित्वाभावे घटाश्रयव्यवहारस्यैव विलोपापत्तिः । विनष्टानुत्पन्न घटव्यवहाराभावात् ।

अथवा - तस्मिन्नेव तत्क्षणवर्तिनि रूपादिसमुदायात्मके घटे पृथुबुध्नोदराद्याकारः स्वरूपं, इतराकारः पररूपं । तेन पृथुबुध्नोदराद्याकारेण घटोस्ति, इतराकारेणनास्ति; पृथुबुध्नोदराद्याकारसत्त्वे घटव्यवहारसत्त्वं तदभावेतदभावइति तादृशाकारनियतत्वा त्तद्व्यवहारस्य । पृथुबुध्नोदराकारेणा प्यस्तित्वाभावे घटस्या सत्त्वापत्तिः, इतराकारेणा प्यस्तित्वे तादृशाकारशून्ये पटादावपि घटव्यवहारप्रसंगः ॥

अथवा - रूपादिविशिष्टो घट श्चक्षुषागृह्यते इत्यस्मि न्व्यवहारे रूपमुखेन घटोगृह्यतइति रूपं स्वरूपं, रसादिःपररूपं । तत्र रूपात्मनास्ति, चक्षु रिन्द्रियमात्र ग्राह्यत्वात । यदि चक्षु र्जन्यज्ञानविषयत्वं रसस्या प्यंगीक्रियते, तदा रसनादीन्द्रियकल्पना व्यर्था । यदिच रसादेरिव रूपस्यापि चक्षुरिन्द्रिय

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

अन्यज्ञानविषयता नस्या त्तदा घटस्यैवा ग्रहणप्रसंगः, रूपादिज्ञान नियतत्वात् घटादिज्ञानस्य ।

अथवा – शब्दभेदे ध्रुवोऽर्थभेदइति घटकुटादिशब्दानाम प्यर्थभेद स्समभिरूढ़नयार्पणात् । घटनात घटः - कौटिल्या त्कुट - इति तत्क्रियापरिणातिक्षणएवः शब्दस्य वृत्ति र्युक्ता । तत्र घटनक्रिया विषयकर्तृत्वं स्वरूपं , इतरत्पररूपं । तत्राद्येना स्ति , इतरेण नास्ति । इत्यादिरीत्या स्वरूपपररूपभेदा ऊह्याः ॥

एवं घटस्य स्वद्रव्यं मृद्द्रव्यं , परद्रव्यं सुवर्णादि । घटो मृदात्मनास्ति, सुवर्णाद्यात्मना नास्ति । घटस्य स्वद्रव्यात्मनेव परद्रव्यात्मनापि सत्त्वे घटो मृदात्मको नसुवर्णात्मक इति नियमो नस्यात् । तथाच द्रव्य प्रतिनियम विरोधः ।

ननु संयोगविभागादे रनेकद्रव्याश्रयत्वेपि नद्रव्यप्रतिनियमो विरुद्धयत इति चेन्न । तस्या नेकद्रव्यगुणत्वेना नेकद्रव्यस्यैव स्वद्रव्यत्वात् , स्वानाश्रयद्रव्यान्तरस्यैव परद्रव्यत्वात् । स्वानाश्रयद्रव्यात्मनापि संयोगादे स्सत्वे स्वाश्रयद्रव्यप्रतिनियमव्याघातस्य तदवस्थत्वात । तथा परद्रव्यात्मनेव स्वद्रव्यात्मनापि घटस्या सत्त्वे सकलद्रव्यानाश्रयत्वप्रसंगेन निराश्रयत्वापत्तिः ।

एवं घटस्य स्वक्षेत्रं भूतलादि , परक्षेत्रं कुड्यादि । घटः स्वक्षेत्रेस्ति, परक्षेत्रे नास्ति । घटस्य स्वक्षेत्रइव परक्षेत्रेपि सत्त्वे प्रतिनियतक्षेत्रत्वानुपपत्तिः । परक्षेत्रइव स्वक्षेत्रे प्यसत्त्वेच निराधारत्वापत्तिः ।

तथा घटस्य स्वकालो वर्तमानकालः , परकालोऽतीतादिः । तत्र स्वकालेस्ति, परकालेनास्ति । घटस्य स्वकालइव परकालेपि सत्त्वे प्रातिनियतकालत्वाभावेन नित्यत्वमेव स्यात । परकालइव स्वकालेप्यसत्त्वे

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

सकलकालासम्बन्धित्वप्रसंगेना वस्तुत्वापत्तिः । कालसम्बन्धित्वमेव हि वस्तुत्वं । एवञ्च घटो घटत्वेनास्ति, पटत्वेन नास्ति, मृद्रव्ये णास्ति, सुवर्णद्रव्येण नास्ति, स्वक्षेत्रादस्ति, परक्षेत्रान्नास्ति, स्वकालादस्ति, परकालान्नास्तीति पर्यवसन्नं ।

अत्रायं बोधप्रकारः – घटत्वेनेति तृतीयार्थोऽवच्छिन्नत्वं, धात्वर्थे न्वेति । असधात्वर्थोऽस्तित्वं सत्त्वपर्यवसन्नं । आख्यातार्थ आश्रयत्वं । तथाच-घटत्वावच्छिन्नास्तित्वाश्रयो घट इति प्रथमवाक्या द्बोधः । अभावाना मधिकरणात्मकतया पटत्वावच्छिन्नाभावस्य घटस्वरूपत्वा त, तत्र नञ्समभिव्याहृता सधातोरभावोर्थः, आश्रयत्वमाख्याता-र्थः, इति रीत्या तादृशाभावाश्रयो घट इति बोधेपि तादृशाभावा त्मकत्वमेव घटस्य सिद्ध्यति, अभावाना मधिकरणात्मकत्वात् । तृ-तीयवाक्ये मृद्रव्यपदोत्तर तृतीयाया अवच्छिन्नत्व मर्थः । एवमग्रेपि बोधा ऊह्याः ॥

ननु – सर्वपदार्थानामपि स्वरूपादिचतुष्टय पररूपादिचतुष्टयाभ्यां व्यवस्थाया मंगीक्रियमाणायां स्वरूपादीनां स्वरूपाद्यन्तरस्याभावा त्कथं व्यवस्था स्यात् ? तेषामपि स्वरूपाद्यन्तरसद्भावे ऽनव-स्था प्रसंगात, सुदूरमपि गत्वा स्वरूपाद्यन्तराभावेपि कस्यचि-द्व्यवस्थायां किं स्वपररूपाद्यपेक्षया सत्वासत्त्वसमर्थनरूपया स्वगृ हमान्यया प्रक्रियया ? यथा प्रतीति वस्तु व्यवस्थोपपत्तेः ॥ इति – चेत् – अनभिज्ञो भवान् वस्तुस्वरूपपरीक्षायाः । वस्तुस्वरूप प्र-तीतिरेव स्वपररूपाद्यवच्छिन्न सत्त्वासत्त्वादिकं विषयी करोतीति निरूपयितु मुपक्रान्तत्वात । अन्यथा नानानिरंकुशविप्रतिपत्तीनां निवार यितु मशक्तेः । वस्तुनोहि यथैवा बाधितप्रतीति स्तथैव स्वरूपव्यव-स्था, 'मानाधीनामेयसिद्धिः' इतिवचनात । एवञ्च-स्वरूपादीनां

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

स्वरूपाद्यन्तरं प्रतीयतेवा नवा ? अन्त्ये स्वरूपाद्यन्तरं नांगीक्रियतएव। एवमपि तेषा मस्तित्व नास्तित्व व्यवस्था ऽग्रे प्रपञ्चयिष्यते । आद्ये स्वरूपादीनामपि स्वरूपाद्यन्तर मंगीक्रियते, प्रतीत्यनुरोधात। नचैव मनवस्था, यत्र स्वरूपाद्यन्तरस्य प्रतीति स्तत्र व्यवस्थोपपत्तेः। तत्र जीवस्य ताव दुपयोगसामान्यं स्वरूपं, तस्य तल्लक्षणत्वात। 'उपयोगो लक्षण' मिति वचनात्। ततोऽन्यो ऽनुपयोगः पररूपं। ताभ्यां सदसत्त्वे प्रतीयेते। उपयोगसामान्यस्य च ज्ञानदर्शनान्यतरत्वं स्वरूपम्, इतर त्पररूपम्। उपयोगविशेषस्य ज्ञानस्य स्वार्थाकारनिश्चयात्मकत्वं स्वरूपम्, दर्शनस्य किंचिदित्यादिरूपेणा काग्रहणम् स्वरूपम्। ज्ञानस्यापि परोक्षस्या वैशद्यं स्वरूपं। प्रत्यक्षस्य वैशद्यं स्वरूम्। दर्शनस्यापि चक्षुरचक्षुर्निमित्तस्य चक्षुरादिजन्यार्थ ग्रहणं स्वरूपं। अवधिदर्शनस्या वधिविषयीभूतार्थ ग्रहणं स्वरूपम्। परोक्षस्यापि मतिज्ञानस्ये न्द्रियानिन्द्रियजन्यत्वेसति स्वार्थाकारव्यवसायात्मकत्वं स्वरूपम्। अनिन्द्रियमात्रजन्यत्वं श्रुतस्य स्वरूपम्। प्रत्यक्षस्यापि विकलस्या वधिमनःपर्यायलक्षणस्ये न्द्रियानिन्द्रियानपेक्षत्वेसति स्पष्टतया स्वार्थव्यवसायात्मकत्वं स्वरूपम्। सकलप्रत्यक्षस्य केवलज्ञानलक्षणस्य सकलद्रव्यपर्यायसाक्षात्करणं स्वरूपम्। ततोन्य त्स्वत्वंतु पररूपम्। ताभ्यां सदसत्त्वे प्रतिपत्तव्ये। एव मुत्तरोत्तर विशेषाणामपि स्वरूपपररूपे बुद्धिमद्भि रूह्ये। तद्विशेष प्रतिविशेषाणा मनन्तत्वात्।

ननु-प्रमेयस्य किं स्वरूपं किंवा पररूपम्? याभ्यां प्रमेयं स्यादस्ति स्यान्नास्तीति व्यपदिश्येतेतिचेत्? उच्यते। प्रमेयस्य प्रमेयत्वं स्व-

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

रूपं, घटत्वादिकं पररूपम् । प्रमेयं प्रमेयत्वेनास्ति, घटत्वादिना नास्ति ॥

अन्येतु – "प्रमेयस्य स्वरूपं प्रमेयत्वं, अप्रमेयत्वं पररूपम् । नच – अप्रमेयत्वं प्रमेयत्वाभाव स्सचाप्रसिद्ध इति वाच्यम्; प्रमेयत्वाभावस्य शशविषाणादौ प्रसिद्धत्वात् । नच – शशविषाणादीनां प्रमेयत्वाभावस्य च व्यवहारविषयत्वेन प्रमेयत्वापत्ति रिति वाच्यम्; तत्साधकप्रमाणाभावेन प्रमेयत्वासिद्धेः । प्रमेयत्वंहि प्रमाणजन्यप्रमितिविषयत्वम्, तच्च प्रमाणाभावे नोपपद्यते । एवञ्च निरुक्त स्वरूप पररूपाभ्याम् प्रमेयस्या स्तित्वनास्तित्वोपपत्तिः । " इत्याहुः ॥

ननु – जीवादिद्रव्याणां षण्णां किं स्वद्रव्यं किंवा परद्रव्यम्? याभ्या मस्तित्वनास्तित्वे व्यवतिष्ठेते, द्रव्यान्तरस्या सम्भवात्, इतिचे दुच्यते । तेषामपि शुद्धं सद्द्रव्य मपेक्ष्यास्तित्वम् तत्प्रतिपक्षं सद्भाव मशुद्धद्रव्य मपेक्ष्य नास्तितत्त्व ञ्चोपपद्यते ॥

ननु – महासत्त्वरूपस्य शुद्धद्रव्यस्य स्वपरद्रव्यादिव्यवस्था कथं? तस्य सकलद्रव्यक्षेत्रकालभावात्मकत्वात्, तद्व्यतिरेकेणान्यद्रव्याद्यभावात्; इति चेन्न;– शुद्धद्रव्यस्यापि सकलद्रव्यक्षेत्रकालाद्यपेक्षया सत्त्वस्य, विकलद्रव्याद्यपेक्षया ऽसत्त्वस्यच, व्यवस्थितेः । 'सत्ता सप्रतिपक्षैका' इति वचनात् ।

एतेन सकलक्षेत्रकालव्यापिनो गगमस्य सकलकालक्षेत्रापेक्षया सत्त्वं यत्किञ्चि त्क्षेत्रकालापेक्षया ऽसत्त्वञ्च निरूपितम् प्रतिपत्तव्यम् ।

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

ननु - अस्तित्वमेव वस्तुनस्स्वरूपं, नपुन र्नास्तित्वं, तस्य पररूपाश्रयत्वात्। यदिच पररूपाश्रितमपि नास्तित्वं वस्तुनः स्वरूपं, तदा पटगतरूपादिकमपि घटस्य स्वरूपं स्यात्; इति चेन्न; उभयस्यापि स्वरूपत्वे प्रमाणसद्भावात्। तथाहि - घटस्य स्वरूपाद्यवच्छिन्नास्तित्वं पररूपाद्यवच्छिन्न नास्तित्वंच प्रत्यक्षेणैव गृह्यते। घटो घटत्वेनास्ति पटत्वेननास्ती त्यबाधित प्रतीतेः। अनुमानप्रयोगश्च - अस्तित्वं स्वभावेना विनाभूतं- विशेषणत्वात, साधर्म्यवत्। यथा साधर्म्यं वैधर्म्येणा विनाभूतं - तथास्तित्वं स्वभावेन नास्तित्वेना विनाभूतम्। अविनाभूतत्वंच नियमेनै काधिकरणवृत्तित्वम्॥

ननु - घटो ऽभिधेयः प्रमेयत्वा दित्यादिहेतौ वैधर्म्यविरहेपि साधर्म्यम् दृश्यतइति साधर्म्यस्य वैधर्म्याविनाभूतत्वाभावा न्न दृष्टान्तसंगतिः, इतिचेदुच्यते। साधर्म्यन्नाम साध्याधिकरणवृत्तित्वेन निश्चितत्वं। वैधर्म्यंच साध्याभावाधिकरणावृत्तित्वेन निश्चितत्वम्। एवंचा भिधेयत्वाभावाधिकरणे शशशृंगादा ववृत्तित्वेन निश्चितत्वं प्रमेयत्वस्य वर्तत इति तादृशहेतो वैधर्म्यं मक्षत मिति।

एवं-नास्तित्वं स्वाभावेना स्तित्वेना विनाभूतम्, विशेषणत्वात्। वैधर्म्यवत्, इत्यनुमानेनापि तयो रविनाभावसिद्धिः।

ननु-पृथिवीऽ तरेभ्योभिद्यते, गन्धवत्त्वा दित्यादि केवलव्यतिरेकि हेतौ वैधर्म्यं साधर्म्येण विनापि वर्ततइति निरुक्तानुमाने दृष्टान्तासंगतिरितिचेन्न। केवलव्यतिरेकिहेतावपि साधर्म्यस्य घटादाविव सम्भवात। इतरभेदाधिकरणे घटे गन्धवत्त्वरूपहेतो र्निश्चितत्वेन साधर्म्यस्या क्षतत्वात्। पक्षभिन्नएव साधर्म्यं न पक्ष इति नियमाभावात्।

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

अथ-शशविषाणादौ नास्तित्व मस्तित्वेन विनापि दृश्यते, इति चेत्? अत्र वदामः । गोमस्तकसमवायित्वेन यदस्तीति प्रसिद्धम् विषाणं, त च्छशादिमस्तकसमवायित्वेन नास्तीति निश्चीयते । मेषादिसमवायित्वेन यानि रोमाणि सन्तीति प्रसिद्धानि- तान्येव कूर्मादिसमवायित्वेन न सन्तीति निश्चीयन्ते । वनस्पति सम्बन्धित्वेन यदस्तीति प्रसिद्धं कुसुमं- तदेव गगनसम्बन्धित्वेन नास्तीति निश्चीयते । तथाचा स्तित्वं नास्तित्वंच परस्पर मविनाभूतमेव वर्तते ।

अपरेतु " यथा देवदत्तादिशब्दानां देवदत्तशरीरावच्छिन्नात्मन्येव शक्तिः, (१) देवदत्तो जानाति सुखमनुभवतीत्यादि प्रयोगानुरोधात्, तथा मण्डूकादिशब्दानामपि मण्डूकादिशरीरावच्छिन्ना त्मन्येव शक्ति रंगीकरणीया । एवंच कर्मादिशवशा न्नानाजाति

---

(१) देहसम्बन्ध मन्तरा ऽऽत्मनो ज्ञानाद्यसम्भवात, शरीरस्य ज्ञानसुखाद्यवच्छेदकत्वात् शरीरस्य ज्ञानाश्रयत्वासम्भवाच्चेति भावः । अत्रच यद्यपि शरीरसंयोगमन्तरा ऽऽत्मनो ज्ञानसुखाद्यसम्भवेन शरीरस्य तदवच्छेदकत्वेपि देवदत्तादिशब्दानां शरीरावच्छिन्नात्म वाचित्व मावश्यकम्, नहि देवदत्त स्सन्ध्या मनुतिष्ठतीत्यादौ सन्ध्या वन्दनस्य द्विजत्वमन्तरा ऽसम्भवात् द्विजत्वादिकमपि देवदत्तशब्दस्यार्थो भवति । तथापि देवदत्तादिशब्दानां शरीरमात्रपरत्व वादिमत खण्डनेन आत्मवाच्त्विस्थापने तात्पर्या न्न दोषः । उक्तप्रयोगयो र्देवदत्तशब्दस्या त्ममात्र वाचित्वेपि देवदत्तो गौर इत्याद्यनुरोधेन शरीरस्यापि तत्पदवाच्यत्व मावश्यकमिति ध्येयम् ।

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

सम्बन्ध मापन्नस्य जीवस्य (१) मण्डूकभवावाप्तौ तत्पदवाच्यता मास्कन्दतः पुन र्युवतिजन्म न्यवाप्ते यश्शिखण्डक स्सएवायमिति प्रत्यभिज्ञानविषयै कजीव सम्बन्धित्वा त्सएव मण्डूकशिखण्ड इति तस्य प्रसिद्धत्वा न्मण्डूक शिखण्डस्या स्तित्वम् ; मण्डूकशरीरावच्छिन्नात्मसम्बन्धिनो मण्डूकशरीर समानकालीन शिखण्डस्याभावाच्च - नास्तित्वम् । यदि च देवदत्तादिशब्दो मण्डूकादिशब्दश्च तत्तच्छरीरवाचकएव , देवदत्तउत्पन्नो विनष्ट इत्यादि व्यवहारात्, सच्च बन्धम्प्र त्येकत्वेन वर्तमानस्य जीवस्यापि बोधको भवतीति मतं । तदा मण्डूकशरीराकारेण परिणत पुद्गल (२) द्रव्यस्या प्यनाद्यन्तपरिणामस्य क्रमेण युवतिभुक्ताहारादि केशभावान्त परिणामा च्छिखण्डक निष्पत्ते र्मण्डूकशिखण्डस्यास्तित्वम् , मण्डूकशरीररूपेण परिणतपुद्गलद्रव्यस्य तत्काले केशपरिणामाभावाच्च नास्तित्वं सिद्ध्यति । एवं वन्ध्यापुत्र शशनरखरविषाण कूर्मरोमादिष्वपि योज्यम् । आकाशकुसुमेतु - अस्तित्व नास्तित्वो पपत्तिरित्थम् । यथा - वनस्पतिनाम कर्मोदयापादित विशेषस्य वृक्षस्य पुष्पमिति व्यपदिश्यते , पुष्पभावेन परिणतपुद्गलद्रव्यस्य तादृशवृक्षापेक्षया भिन्नत्वेपि तेन व्याप्तत्वात् ; तथाऽऽकेशेनापि पुष्पस्य व्याप्तत्वं समान मि त्याकाश कुसुम मिति व्यपदेशो युक्तः ॥ अथ मल्लिकाकुतो पकारापेक्षया मल्लिकाकुसुम मिति व्यपदिश्यते , नत्वाकाशकुसुम

---

(१) मण्डूकभवावाप्तिः - मण्डूकजन्मप्राप्तिः ।

(२) एतन्मते परमाणुस्थानीयं पुद्गलाख्यं द्रव्य मंगीक्रियते। परमाणुरेव वा ।

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

मिति ; कुसुमस्याकाशेनोपकाराभावात् , इति चेन्न ; – आकाशकृता वगाहनरूपो पकार मादाया काशकुसुम मिति व्यपदेशस्य दुर्वारत्वात् ॥ किंच – वृक्षा त्प्रच्युतमपि कुसुम माकाशा न्न प्रच्यवत इति नित्य मेवा काश सम्बन्धो वर्तते ॥

यदिच – मल्लिकालता जन्यत्वा न्मल्लिका कुसुम मित्युच्यते, तदाऽऽकाशस्यापि सर्वकार्ये ष्ववकाशप्रदत्वेन कारणत्वा दाकाश कुसुममिति व्यवहारो दुर्वारः ॥ अथा काशापेक्षया पुष्पस्य भिन्नत्वा न्नाकाश कुसुम–मिति व्यवहार इतिचेत् – भिन्नत्वं किं कथंचित्? सर्वथावा? आद्ये मल्लिका कुसुम मित्यपि व्यवहारो माभूत, मल्लिकापेक्षया कथञ्चि द्भिन्नत्वा त्पुष्पस्य । अन्त्ये त्वाकाशापेक्षया पुष्पस्य सर्वथा भिन्नत्व मसिद्धम् । द्रव्यत्वादिना कथंचि दभेदस्यापि सद्भावात् । तस्मा न्मल्लिकाकुसुम माकाश कुसुम मित्यनयो र्नकोपि विशेषइति सिद्धान्तस्या स्तिनास्त्यात्मकत्वम् ॥ " इत्याहुः ॥

अथ-अस्त्येवजीव इत्यत्रा स्तिशब्दवाच्या दर्था द्भिन्नस्वभावो जीव शब्दवाच्योऽर्थस्स्यात ? अभिन्नस्वभावोवा ? यद्यभिन्नस्वभाव स्तदा जीवशब्दार्थो ऽस्तिशब्दार्थ श्चैकएवेति सामानाधिकरण्य विशेषणविशेष्यभावादिकं नस्यात् । घटःकलश इत्यादि सामानाधिकरण्या द्यभाववत् । तदन्यतरपदाप्रयोगप्रसंगश्च । किंच-सत्त्वस्य सर्वद्रव्यपर्याय विषयत्वा त्तदभिन्नस्वभावस्यापि जीवस्य तथात्वं प्राप्तमिति सर्वस्य तत्त्वस्य जीवत्वप्रसंगः । यदिपुन रस्तिशब्द वाच्या दर्था द्भिन्नएव जीवशब्द वाच्योऽर्थः कल्प्यते, तदा जीवस्या सद्रूपत्वप्रसंगः । अस्तिशब्दवाच्या दर्था द्भिन्नत्वात् । प्रयोगश्च - नास्ति जीवः, अस्तिशब्दवाच्यापेक्षया–

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

भिन्नत्वात् , शशविषाणवत् । अस्तित्वस्य जीवाद्भिन्नत्वेव त्स्वकलार्थेभ्योपि भिन्नत्वा न्निराश्रयत्वा दभावप्रसंगः । नच - जीवादिभ्यो- भिन्नम प्यस्तित्वं समवायेन जीवादिषु वर्ततइति वाच्यं, तस्यान्यत्र- निराकरणात । इतिचेत् , अत्रोच्यते । अस्तिशब्दवाच्य जीवशब्द वाच्यार्थयो र्द्रव्यार्थादेशा दभिन्नत्वम् , तयोः पर्यायार्थादेशा द्भिन्नत्व- मि त्यनेकान्तवादिनां न कोपिदोषः , तथा प्रतीतेः । इत्यग्रे व्यक्ती भविष्यति ॥

इति प्रथमद्वितीयभंग द्वयं निरूपितम् ।

अथ तृतीय भंगस्तु निरूप्यते ।

घट स्स्यादस्तिच नास्तिचेति तृतीयः । घटादिरूपैक धर्मिविशे ष्यक क्रमार्पित विधिप्रतिषेधप्रकारक बोधजनकवाक्यत्वं तल्लक्षणम् । क्रमार्पित स्वरूप पररूपाद्यपेक्षया ऽस्तिनास्त्यात्मको घट इति निरूपित प्रायम् ।

सहार्पितस्वरूप पररूपादिविवक्षायां स्या दवाच्यो घट इति चतुर्थः । घटादिविशेष्यका वक्तव्यत्वप्रकारक बोध जनकवाक्यत्वम् तल्लक्षणम ।

ननु-कथ मवक्तव्यो घटः, इति चे दत्रब्रूमः । सर्वोपि शब्दः प्रधानतया न सत्वासत्वे युगप त्प्रतिपादयति , तथा प्रतिपादने शब्द स्य शक्त्यभावात्, सर्वस्य पद स्यैक पदार्थविषयत्वसिद्धेः । अस्तीतिपदंहि सत्तावाचकं नासत्वं प्रतिपादयति , तथा नास्तीतिपद मस-

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

स्ववाचकं न सत्तां बोधति । अस्त्यादिपदस्या स्तित्व नास्तित्वोभय धर्मवाचकत्वेच तदन्यतरपदाप्रयोगप्रसंगः ।

ननु - सर्वेषां पदाना मेकार्थत्वनियमे नानार्थकपदोच्छेदापत्तिः, इति चेन्न, - गवादिपदस्यापि स्वर्गा द्यनेकार्थविषयतया प्रसिद्धस्य तत्त्वतो ऽनेकत्वात्, साद्दश्योपचारादेव तस्यैकत्वेन व्यवहरणात्। अन्यथा - सकलार्थस्या प्येकशब्दवाच्यत्वापत्ते रर्थभेदेना नेकशब्दप्रयोग वैफल्यात् । यथैवहि समभिरूढनयापेक्षया शब्दभेदा द्ध्रुवोऽर्थ भेद स्तथाऽर्थभेदादपि शब्दभेद स्सिद्धएव । अन्यथा वाच्यवाचक नियम-व्यवहार विलोपात् ।

एतेन - एकस्य वाक्यस्य युगप दनेकार्थविषयत्वं प्रत्याख्यातम्, स्यादस्तिनास्त्येव घटः- स्वरूप पररूपादि चतुष्टयाभ्यामिति वाक्य-स्यापि क्रमार्पितोभय विषय धर्मतयो ररीकृतस्य उपचारादे-वैकत्वांगीकारात ॥ अथवा - तत्र क्रमशो विवक्षितम् य दु-भयप्राधान्य मेकं, तदेवा स्तिनास्तिशब्दाभ्या मभिहितमिति ताद्दश वाक्य स्यैकार्थाभिधायित्वादेवै कवाक्यत्वमिति नदोषः । सर्वस्य वाक्य स्यैकक्रियाप्रधानतयै कार्थविषयत्वप्रसिद्धे रेकार्थबोधनशक्ति श्शब्दस्य सिद्धा । नहि शब्दानां वचनसामर्थ्यं सूचनसामर्थ्यंवा ऽतिक्रम्या र्थबोधने प्रवृत्ति स्सम्भवति । अस्तिशब्दस्यहि सत्त्वमात्र-वचने सामर्थ्यविशेषो ना सत्त्वा द्यनेकधर्म वचने । निपातानां वाच-कत्वपक्षे स्यादिति शब्दस्या नेकान्तसामान्यवचने सामर्थ्यविशेषो न पुन रेकान्तवचने, ना प्यनेकान्त विशेषवचने, तेषां द्योतकत्वपक्षे चा नेकान्तसूचने सामर्थ्यविशेषो नान्यत्रेति वचनसूचनसामर्थ्य मतिक्र-म्य शब्दप्रयोगो वृद्धव्यवहारेषु क्वापि न द्दष्टचरइति ॥

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

ननु – यथासङ्केतं शब्दप्रवृत्तिदर्शना द्युगप त्सदसत्त्वयो स्सङ्केतित श्शब्द स्तद्वाचकोऽस्तु, शतृशानचो र्द्वयो स्संकेतित सनितिसंज्ञाशब्दवत्; युगप च्चन्द्रसूर्ययो स्संकेतितपुष्पवन्तादिपदवद्वा । इतिचेन्न ;– संकेतस्यापि वाच्यवाचकशक्त्यनुरोधेनैव प्रवृत्तेः । नहि वाच्यवाचकशक्त्यतिलंघनेन संकेतप्रवृत्ति र्दृष्टचरी । यथा – कर्तु रयसो दारुलेखने शक्ति र्नतथा वज्रलेखनेस्ति, यथावा वज्रलेखने तस्या शक्ति र्नतथा दारुलेखने, यथाच दारुणः कर्मणोऽयसा लेख्यत्वे शक्ति र्न तथा वज्रस्यास्ति, यथावा वज्रस्य तत्राशक्ति र्नतथा दारुणोपीति, निश्चयः । एवं शब्दस्यापि सकृ देकस्मि न्नेवार्थे प्रतिपादनशक्ति रनेकस्मि न्नर्थेपुनः प्रतिपादना शक्तिः, तथा – एकस्यैवा र्थस्यै कपदवाच्यताशक्ति र्नपुन रनेकस्यापीति निश्चयः । पुष्पवन्तादिशब्दानामपि क्रमेणा र्थद्वयप्रतिपादन एव सामर्थ्य मिति न दोषः ॥

ननु – सेना वन युद्ध पंक्ति माला पानक ग्राम नगरादि शब्दाना मनेकार्थप्रतिपादकत्वं दृष्ट मिति चेन्न ;– करि तुरग रथ पदाति समूहस्यैवै कस्य सेनाशब्देनाभिधानात, वृक्षसमूहस्य वनशब्देन, पुष्पसमूहस्य मालाशब्देन, गुडादिद्रव्यसमूहस्य पानकशब्देन, प्रासादादिसमूहस्य नगरशब्देन, चाभिधाना, न्नै कशब्देना नेकार्थ प्रतिपादनं दृश्यते ।

नन्वेवं - वृक्षाविति पदं वृक्षद्वयबोधकं वृक्षाइतिच बहुवृक्षबोधकं कथ मुपपद्यतइति चेत ? पाणिन्यादीना मेकशेषारम्भा ज्जैनेन्द्राणा मभिधानस्य स्वाभाविकत्वा दिति ब्रूमहे । तत्रैकशेषपक्षे

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

द्वाभ्यामेव वृक्षशब्दाभ्यां वृक्षद्वयस्य बहुभिरेव वृक्षशब्दै र्बहूनां वृक्षाणा मभिधाना न्नैकशब्दस्य सकृ दनेकार्थ बोधकत्वम् । लुप्ता-वशिष्टशब्दयो स्साम्या द्वृक्षरूपार्थस्य समानत्वा च्चैकत्वो पचारात्त न्नेकशब्द प्रयोगोपपत्तिः । अभिधानस्य स्वाभाविकत्वपक्षेच वृक्ष-शब्दो द्विबहुवचनान्त स्स्वभावत एव द्वित्वबहुत्व विशिष्टं वृक्षरू पार्थ मभिदधाति । वृक्षावित्यत्रहि वृक्षत्वावच्छिन्नो वृक्षशब्दार्थः, द्वित्वंच द्विवचनार्थः, प्रत्ययार्थस्य प्रकृत्यर्थेऽन्वयात् द्वित्वविशिष्टौ वृक्षाविति बोधः। वृक्षाइत्यत्रच बहुवचनार्थो बहुत्वमिति बहुत्वविशिष्टा वृक्षा इति बोधः ।

यद्यपि द्वितीयपक्ष एकस्यैव वृक्षपदस्या नेक वृक्षबोधकत्वं प्रा-प्तम् । तथा प्यनेकधर्मावच्छिन्नार्थबोधकत्व मेकपदस्य नास्तीति-नियमः । एवंच वृक्षा इति बहुवचनान्तेनापि वृक्षपदेन वृक्षरूपैक धर्मावच्छिन्नस्यैव बोधो नान्यधर्मावच्छिन्नस्य । तथाचा स्त्यादि पदेना प्यस्तित्वादि रूपै कधर्मावच्छिन्नस्य बोध स्सम्भवति , नतु-नास्तित्वादि धर्मान्तरावच्छिन्नस्येति ॥

ननु - वृक्षा इति प्रत्ययवती प्रकृतिः पदम् , "सु-प्तिङन्तं पदम्" इति वचनात । तथाच - वृक्षाइति बहुवचना-न्तेन बहुत्व वृक्षत्वरूपानेक धर्मावच्छिन्नस्य बोधा देकपदस्या नेक धर्मा वच्छिन्नबोधकत्वं नास्तीति नियमस्य भंगप्रसंगः ।

तदुक्तम्-

"अनेकमेकंच पदस्य वाच्यं वृक्षा इति प्रत्ययव त्प्रकृत्या ।"

इति ।

इतिचेत्सत्यम्,-एकपदस्य प्रधानतयाऽनेकधर्मावच्छिन्नबोधकत्वं-नास्तीति नियमस्यो क्तत्वात् । प्रकृतेच प्रथमतो वृक्षशब्दो वृक्षत्वरूप-

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

जात्यवच्छिन्नं द्रव्यं बोधयति । ततो लिंगं संख्यां चेति शाब्दबोधः क्रमेणैव जायते ।

तदुक्तम् -

" स्वार्थ मभिधायशब्दो निरपेक्षो द्रव्य माह समवेतम् ।
समवेतस्यतुवचने लिंगसंख्यां विभक्तियुक्तस्तन् ।"

इति ।

एवंच प्रधानभावेन वृक्षत्वावच्छिन्नस्य प्रतीति गुणभावेन बहुत्वसंख्याया इति न कश्चिद्दोषः ।

अथैकस्य पदस्य वाक्यस्यवा प्रधानभावेना नेक धर्मावच्छिन्न वस्तु बोधकत्वा नंगीकारे प्रधानभावेना शेषधर्मात्मकस्य वस्तुनः प्रकाशकं प्रमाणवाक्यं कथ मुपपद्यते? इतिचेत्-कालादिभि रभेदवृत्त्या ऽभेदोपचारेणवा द्रव्यपर्यायनयार्पितेन सकलस्य वस्तुनः कथनात् । इति निरूपितं प्राक् ।

ननु ' सत्त्वासत्त्वे ' इतिद्वन्द्वसमासपदं सत्त्वासत्त्वयोः प्राधान्येन बोधकम् । " उभयपदार्थप्रधानोद्वन्द्वः " इतिवचनात् , एवंच कथ मवाच्यत्वं सदसत्त्वात्मकवस्तुनः ? इतिचेन्न - द्वन्द्वस्यापि क्रमेणैवा धर्मद्वयप्रत्यायन समर्थत्वेन गुणप्रधानभावस्य तत्रापि सत्त्वात् । अतएव - " अभ्यर्हितं पूर्वम् " इतिप्रधानभूतार्थस्य पूर्वनिपातानुशासनं संगच्छते । अस्तुवा - द्वन्द्व उभयस्यापि प्राधान्येनबोधः । अथापि प्रधानभावेना स्तित्व नास्तित्वोभयावच्छिन्नस्य धर्मिणः प्रतिपादक शब्दाभावा दवाच्यत्व मक्षतम् ।

नच - ' सदसत्त्वविशिष्टं वस्तु ' इत्यनेन द्वंद्वगर्भित तत्पुरुषेण सदसत्त्वविशिष्टपदेन तदुभयधर्मावच्छिन्नस्य वस्तुनो बोधसम्भवा-

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

दिति वाच्यं, तत्र सदसत्त्ववैशिष्टयस्यैव प्रधानतया तयो रप्रधानत्वात् । "उत्तरपदार्थप्रधान स्तत्पुरुषः" इति वचनात । तस्मा त्सकळवाचक रहितत्वा त्स्या दवक्तव्यो घटइति सिद्धम् ॥

तच्च न सर्वथैवा वक्तव्यं, अवक्तव्यशब्देना स्य वक्तव्यत्वात् । अत स्स्यादवक्तव्यो घट इति चतुर्थ भंगः । इति केचि द्व्याचक्षते । तत्रेदं चिन्त्यं, अवक्तव्यशब्दस्या भिधेयं किमिति ।

नच - प्रधानभूत सदसत्त्वरूपधर्मावच्छिन्नं वस्तु अवक्तव्यशब्देनाभिधीयत इति वाच्यम्; तथा सति तस्य सकलवाचकराहित्यक्षतेः, अवक्तव्यशब्दस्य तद्वाचकस्य सत्त्वात्, एकपदस्य प्रधानभूता नेकधर्मावच्छिन्न वस्तुबोधकत्वं नास्तीति नियमस्य भंगप्रसंगाच्च ।

किञ्च - यथा ऽवक्तव्यमिति पदं सांकेतिकं तादृशोभयधर्मावच्छिन्नस्य वाचकं, तथा सांकेतिक मन्यदपि तद्वाचकं कुतो नभवति ?

ननु - अन्यस्य सांकेतिकपदस्य क्रमेणै तादृशधर्मावच्छिन्नवस्तुबोधकत्वमितिचेत्; अवक्तव्यपदस्यापि युगप त्तद्वाचकत्वं माभूत् । यथा - सांकेतिकपदान्तरेण सत्त्वासत्त्वादिधर्मावच्छिन्नं वस्तु क्रमेण प्रतीयते, तथा ऽवक्तव्यपदेनापि, उभयो र्विशेषाभावात् । अवक्तव्यपदेनहि वक्तव्यत्वाभावरूपधर्मावच्छिन्नं वस्तु प्रतीयते, नतु सत्त्वासत्त्वादिरूपानेकधर्मावच्छिन्नं वस्त्विति सर्वानुभवसाक्षिक मेतत् ।

अथैवम् -

"उक्तिश्चा वाच्यतैकान्ते ना वाच्यमिति युज्यते ।"

इति स्वामिसमन्तभद्राचार्यवचनं कथं संघटते? सत्त्वासत्त्वविशिष्टस्य वस्तुन स्सर्वथा ऽवाच्यत्वे तस्या वाच्यशब्देनापि वा-

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

च्यत्वं नस्यादिति तत्र प्रतिपादनात्, इति चेन्न; तदर्थापरिज्ञानात् । अयंखलु तदर्थः, सत्त्वाद्येकैकधर्ममुखेन वाच्यमेव वस्तु युगप त्प्रधानभूत सत्त्वासत्त्वोभयधर्मावच्छिन्नत्वेना वाच्यम्, तादृश वस्तुनः सत्त्वाद्येकधर्ममुखेनाप्य वाच्यत्वे वाच्यत्वाभावधर्ममुखेना वाच्यशब्देनापि वाच्यत्वं नस्या दिति । एतादृशव्याख्या मपहाय सत्वासत्त्वोभयरूपेणा वाच्यं वस्तु तादृशरूपेणैवा वाच्यशब्देन वाच्यं भवतीति व्याख्याने येन रूपेणा वाच्यम् वस्तु - तेनैव रूपेण वाच्यम् प्राप्तमिति येन रूपेण सत्त्वं तेनैव रूपेणा सत्त्व मप्यंगीक्रियताम् । तथाच -

" विरोधा न्नोभयैकात्म्यं स्या द्वादन्यायवेदिनाम् । "

इति तदीयवचनमेव विरुद्धयते ।

सिद्धान्तविदस्तु - अवक्तव्यएव घट इत्युक्ते सर्वथा घटस्या वक्तव्यत्वं स्यात्, तथाचा स्तित्वादिधर्ममुखेनापि घटस्य प्रथमादिभंगै रभिधानं नस्यात्, अतः स्यादिति निपातप्रयोगः । तथाच सत्त्वादिरूपेण वक्तव्यएव घटो युगप त्प्रधानभूत सत्त्वासत्त्वोभय रूपेणा वक्तव्यइति चतुर्थभंगार्थ निष्कर्ष इति प्राहुः ॥

व्यस्तसमस्तद्रव्यपर्याया वाश्रित्य चरमभंगत्रय मुपपादनीयम् । तथाहि - व्यस्तं द्रव्यं समस्तौ सहार्पितौ द्रव्यपर्याया वाश्रित्य स्या दस्ति चावक्तव्यएव घट इति पंचमभंगः । घटादिरूपैक धर्मिविशेष्यक सत्त्वविशिष्टावक्तव्यत्वप्रकारक बोधजनकवाक्यत्वं तल्लक्षणम् । तत्र द्रव्यार्पणा दस्तित्वस्य युगप द्द्रव्यपर्यायार्पणा दवक्तव्यत्वस्यच विवक्षितत्वात् ।

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

तथा व्यस्तं पर्यायं समस्तौ द्रव्यपर्यायौ चाश्रित्य स्या न्नास्ति चावक्तव्यएव घट इति षष्ठः । तल्लक्षणंच घटादिरूपैक धर्मिविशेष्यक नास्तित्वविशिष्टा वक्तव्यत्व प्रकारक बोधजनक वाक्यत्वम् ।

एवम् व्यस्तौ क्रमार्पितौ समस्तौ सहार्पितौच द्रव्यपर्याया वाश्रित्य स्या दस्ति नास्ति चावक्तव्यएव घट इति सप्तमभंगः । घटादिरूपैकवस्तुविशेष्यक सत्त्वासत्त्वविशिष्टावक्तव्यत्व प्रकारक बोधजनक वाक्यत्वं तल्लक्षणम् । इति संक्षेपः ॥

अत्र - द्रव्यमेव तत्त्वं, अतस्स्यादस्तीति भंग एकएवेति सांख्य मत मयुक्तम् ; - पर्यायस्यापि प्रतीतिसिद्धत्वात् । तथा - पर्यायएव तत्त्वं, अत स्स्या न्नास्तीति भंगएवेति सौगतमतमपि युक्तिदुर्गतम् ; द्रव्यस्यापि प्रतीतिसिद्धत्वात् । एव मवक्तव्यमेव वस्तुतत्वमि त्यव क्तव्यत्वैकान्तोपि स्ववचनपराहतः, सदा मौनव्रतिकोह मितिवत् । एवमेवा न्येषा मेकान्तानां प्रतीतिपराहतत्वा दनेकान्तवादएवा वतिष्ठते ।

ननुच - अनेकान्तेपि विधिप्रतिषेधरूपा सप्तभंगी प्रवर्ततेवा नवा ? यदि प्रवर्तते - तदाऽनेकान्तस्य निषेधकल्पनाया मेकान्तएव प्राप्तइति तत्पक्षोक्त दोषानुषंगः । अनवस्थाच । तादृशैकान्तस्या प्य परानेकान्तकल्पनया विधिप्रतिषेधयो र्वक्तव्यत्वात् । यदि सा न प्रवर्तते- तदा सर्वं वस्तुजातं सप्तभंगी संवलित मिति सिद्धान्तव्या घातः । इति चेन्न, - प्रमाणनयार्पणाभेदा त्तत्रापि तदुपपत्तेः । तथाहि - एकान्तो द्विविधः - सम्य गेकान्तो मिथ्यैकान्त इति । अनेकान्तोपि द्विविधः, सम्य गनेकान्तो मिथ्यानेकान्त इति । तत्र

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

सम्य गेकान्त स्ताव त्प्रमाणविषयीभूता नेक धर्मात्मक वस्तुनिष्ठै कथ- भंगोचरो धर्मान्तराप्रतिषेधकः । मिथ्यैकान्त स्त्वेकधर्ममात्रावधार णेना न्याशेषधर्मनिराकरणप्रवणः । एव मेकत्र वस्तु न्यस्तित्व नास्तित्वादि नानाधर्मनिरूपणप्रवणः प्रत्यक्षानुमानागमाविरुद्ध स्स- म्य गनेकान्तः । प्रत्यक्षादिविरुद्धा नेक धर्मपरिकल्पनं मिथ्याने- कान्तः । इति । तत्र सम्यगेकान्तो नयः, मिथ्यैकान्तो नया भासः । सम्य गनेकान्तः प्रमाणं ; मिथ्यानेकान्तः प्रमाणाभा सः । इति व्यपदिश्यते ।

तथाच- सम्यगेकान्त सम्यगनेकान्ता वाश्रित्य प्रमाण नयार्पणा- भेदात , स्यादेकान्तः, स्यादनेकान्तः, स्यादुभयः, स्यादवक्तव्यः, स्या देकान्तश्चावक्तव्यश्च, स्यादनेकान्तश्चावक्तव्यश्च, स्यादेकान्तोनेकान्तश्चा वक्तव्य श्चेति सप्तभंगी योज्या । तत्र नयार्पणा देकान्तो भवति , एक- धर्मगोचरत्वा न्नयस्य । प्रमाणा दनेकान्तोभवति , अशेषधर्मनिश्चया- त्मकत्वा त्प्रमाणस्य । य द्यनेकान्तो ऽनेकान्तएव न त्वेकान्तइतिमतम् । सदा - एकान्ताभावे तत्समूहात्मकस्या नेकान्तस्या प्यभाव प्रसंगः, शा- खाद्यभावे वृक्षाद्यभाववत । इत्येवं मूलभंगद्वयेसिद्धे उत्तरेच भंगा- एवमेव योजयितव्याः ॥

इयंच सप्तभंगी नित्यत्वा नित्यत्वैकत्वानेकत्वादि धर्मेष्वपि नि- रूपयितव्या । यथा स्यान्नित्योघटः, स्यादनित्योघट इतिमूलभंगद्व यं , घटस्य द्रव्यरूपेण नित्यत्वा त्पर्यायरूपेणा नित्यत्वात् ।

तदुक्तम् ।

" समुदेति विलयमृच्छति भावोनियमेन पर्ययनयेन ।
नोदेति नोविनश्यति द्रव्यनयालिङ्गितोनित्यम् ॥ " इति ।

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

ननु- स्यान्नित्योघटइत्यत्र स्याच्छब्दः कथञ्चिदर्थकः, अवच्छिन्नत्वं संसर्गः, द्रव्यरूपावच्छिन्न नित्यत्ववान् घट इतिबोधश्च प्रथमवाक्यस्य युक्तः । द्वितीयवाक्येचा नित्यपदस्य नित्यभेदोऽर्थः, एवंच्च पर्यायरूपावच्छिन्न नित्यभेदवान् घटइति बोधः प्राप्नोति । सचायुक्तः । द्रव्यरूपेण नित्ये घटे नित्यभेदस्य बाधितत्वात्; भेदस्य व्याप्यवृत्तित्वात् । इति चेदुच्यते;- मूले वृक्ष स्संयोगीने त्यबाधितप्रतीत्या भेदस्या प्यव्याप्यवृत्तित्व मंगीक्रियत एव । अव्याप्यवृत्तित्वंच प्रकृते प्रतियोगिवृत्तित्वम् । संयोगिभेदस्य प्रतियोगी संयोगवान् वृक्षः, तद्वृत्तित्वं संयोगिभेदस्या क्षतम्; वृक्षे मूलावच्छेदेन संयोगिभेदस्य सत्त्वात् । तथाच घटेपि पर्यायावच्छेदेन नित्यभेदो वर्तत इति पर्यायरूपावच्छिन्न नित्यभेदवान् घट इति बोधे न कापि क्षतिरिति बोध्यम् ।

एकत्वानेकत्व सप्तभंगी यथा – स्या देको घटः, स्या दनेको घटइति मूलभंगद्वयम् । द्रव्यरूपेणैको घटः, स्थासकोशकुसूलादिषु मृद्द्रव्यस्यैकस्या नुगतत्वात्, तस्योर्ध्वता सामान्यरूपत्वात् । पर्यायरूपेणा नेको घटः, रूपरसाद्यनेकपर्यायात्मकत्वात् घटस्य ।

नन्वेवमपि सर्वं वस्तु स्या देकं स्या दनेकमिति कथं संगच्छते? सर्वस्य वस्तुनः केनापि रूपेणै क्याभावात् । नच – सत्त्वादिरूपेण सर्वस्यैक्यं सम्भवतीति वाच्यम्; सत्त्वस्यापि सकलवस्तुव्यापिन एकस्य सिद्धान्त विरुद्धत्वात् । सदृशपरिणामस्यैकैकव्यक्तिगतस्य तत्तद्व्यक्त्यात्मकस्य प्रतिव्यक्ति भिन्नस्यैव सिद्धान्त सिद्धत्वात । तदुक्तम् – " उपयोगोलक्षणम् " इति सूत्रे तत्वार्थश्लोकवार्तिके –

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

" नहि वयं सदृशपरिणाम मनेकव्यक्तिव्यापिनं युगप दुपगच्छामो ऽन्यत्रोपचारात् " इति ।

सूत्रितंच माणिक्यनन्दिस्वामिभिः —

" सदृशपरिणाम स्तिर्यक् खण्डमुण्डादिषु गोत्ववत् " इति ।

विवृतंचैत न्मार्ताण्डे —

" सदृशपरिणामात्मक मनेकं तिर्य क्सामान्यं " इति ।

तस्मा त्सत्त्वस्यापि तिर्यक्सामान्यरूपस्य प्रतिव्यक्ति भिन्नत्वात् कथं सर्वस्य वस्तुन स्सत्त्वेन रूपे णैक्यम् ? इतिचेत ;– अत्रब्रूमः । सत्तासामान्य मेका नेकात्मकमेव सिद्धान्ते स्वीकृतम् । सत्त्वंहि व्यक्त्यात्मनाऽनेकमपि स्वात्मनैकंभवति । पूर्वोदाहृतपूर्वाचार्य वचनानां च सर्वथैक्य निराकरणपरत्वात् । अन्यथा सत्तासामान्यस्य सर्वथा नेकत्वे पृथक्त्वैकान्तपक्षएवा हतस्स्यात । तथाच " पृथक्त्वैकान्त पक्षेपि " इत्यादि स्वामिसमन्तभद्राचार्यवचनं तद्व्याख्यानभूत मकळंकादिवचनंच विरुद्ध्यते । अनेक व्यक्त्यनुगतस्यै क धर्मस्यानंगीकारे सादृश्यमेव दुर्वचनम् , यत स्तद्भिन्नत्वेसति तद्गत भूयो ध र्मवत्वम् सादृश्यम् । यथा – चन्द्रभिन्नत्वेसति चन्द्रगताह्लादकरत्वादि मुखे चन्द्रसादृश्यम् , एवं घटयोरपि परस्परसाधर्म्यं घटत्वरूपैकधर्म मादायैवोपपद्यते । अन्यथा साधारणधर्मा साधारणधर्म व्यवस्थैव न घटते । अनेकव्यक्ति वृत्तित्वमेव हि साधारणत्वम् । तस्मा त्सत्त्वादिना सर्वस्यैक्यम् जीवादिद्रव्यभेदेना नेकत्वम् चोपपन्नम् ।

तदिदमाहुः स्वामिसमन्तभद्राचार्याः–

" सत्सामान्यात्तु सर्वैक्यं पृथग्द्रव्यादिभेदतः ।

६

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

भेदाभेद विवक्षाया मसाधारणहेतुवत् ॥ ” इति ।

यथा-हेतुः पक्षधर्मत्वादिभेद विवक्षाया मनेकः, हेतुत्वेनैकश्च । तथा सर्वं सत्त्वादिभि रेकं जीवद्रव्यादिभेदेना नेकमिति तदर्थः । प्रपंचित श्चाय मर्थो देवागमालंकार इति नेहो च्यते ।

अत्रा प्यनेक पदस्यैक भिन्नार्थकतया एकस्मिन् घटादा वेकभेदः कथं वर्तत इतिचोद्ये, पर्यायावच्छेदेन वर्तते- यथा वृक्षे मूलावच्छेदेन संयोगिभेद इतिः, पूर्वव त्परिहारो बोध्यः ।

एवं अयं स्याज्जीवः स्यादजीव इति मूलभंगद्वयम् । तत्रोपयोगात्मनाजीवः, प्रमेयत्वाद्यात्मना ऽजीव इति तदर्थः ।

तदुक्तं भट्टाकळंकदेवैः –

“ प्रमेयत्वादिभि धर्मै रचिदात्मा चिदात्मकः ।
ज्ञानदर्शनत स्तस्मा च्चेतनाऽचेतनात्मकः ॥ ” इति ।

अजीवत्वंच प्रकृते ऽजीववृत्तिप्रमेयत्वादि धर्मवत्वम् , जीवत्वंच ज्ञानदर्शनादिमत्त्व मिति द्रष्टव्यम् ।

नन्वय मनेकान्तवाद श्छलमात्रमेव , तदेवास्ति तदेव नास्ति, तदेव नित्यं तदेवानित्यमिति प्ररूपणारूपत्वा दनेकान्त वादस्य । इति चेन्न ; -- छललक्षणाभावात । अभिप्रायान्तरेण प्रयुक्तस्य शब्दस्या र्थान्तरं परिकल्प्य दूषणाभिधानं छलमिति छलसामान्य लक्षणम् । यथा नवकम्बळोयं देवदत्तइति वाक्यस्य नूतनाभिप्रायेण प्रयुक्तस्या र्थान्तर माशंक्य कश्चिद्दूषयति , नास्य नवकम्बळा स्सन्ति दारिद्र्यत्वात ; नह्यस्य द्विकम्बळवत्त्वमपि सम्भाव्यते ; कु-

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

तो नवेति । प्रकृतेत्वा नेकान्तवादे तादृश छलक्षणस्य प्रसक्तिरेव नास्ति, अभिप्रायान्तरेण प्रयुक्तस्य शब्दस्या र्थान्तर परिकल्पनाभावात ॥

अथ संशयहेतु रनेकान्तवादः , एकस्मि न्वस्तुनि विरुद्धाना मस्तित्व नास्तित्वादि धर्माणा मसम्भवात ; एकवस्तुविशेष्यक-विरुद्ध नानाधर्मप्रकारक ज्ञानंहि संशयः । यथा - स्थाणुर्वा नवे त्याकारकज्ञानं एकधर्मिविशेष्यक स्थाणुत्व तदभावप्रकारक ज्ञान-त्वात्संशयः । तथात्वा स्तित्व नास्तित्वादिरूप विरुद्ध नानाधर्मप्रकार क घटादिरूपैक वस्तुविशेष्यक ज्ञानजनकत्वा त्संशयहेतु रनेकान्त वादः । इतिचेन्न ; -- विशेषलक्षणोपलब्धेः । संशयोहि सा मान्यप्रत्यक्षा द्विशेषाप्रत्यक्षा द्विशेषस्मृतेश्च जायते । यथा स्थाणुपुरुषोचिते देशे नातिप्रकाशा न्धकारकलुषायां वेळाया मूर्ध्व मात्रं - सामान्यं पश्यतः , वक्र कोटर पक्षिनीडादीन् स्थाणु गता न्विशेषा न्वस्त्र संयमन शिरः कण्डूयन शिखा बन्ध-नादीन्पुरुषगतां श्चानुपलभमानस्य तेषां च स्मरतः पुरुष स्यायं स्था णुर्वा पुरुषोवेति संशय उपपद्यते । अनेकान्तवादे च विशेषोपल-ब्धि रप्रतिहतैव , स्वरूप पररूपादि विशेषाणां प्रत्यर्थ मुपलम्भात । तस्मा द्विशेषोपलब्धे रनेकान्तवादो न संशयहेतुः ।

अथैवमपि संशयोदुर्वारः , तथाहि - घटादावस्तित्वादि धर्माणां साधकाः प्रतिनियता हेतव स्सन्तिवा नवा ? नचे द्विप्रतिपन्नं प्रति प्रतिपादनासम्भवः । सन्तिचे देकत्र वस्तुनि परस्परविरुद्धास्ति त्व नास्तित्वादिसाधक हेतुसद्भावा त्संशयो दुर्वारः । इतिचेन्न ; अस्तित्वनास्तित्वयो रवच्छेदकभेदेना प्यमाणयो र्विरोधाभावात । यथा - एकस्यैव देवदत्तस्यै कापेक्षया पितृत्व मन्यापेक्षया पुत्रत्वंच

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

परस्परमविरुद्धम् , यथाचा न्वयव्यतिरेकि धूमादिहेतौ सपक्षे महानसादौ सत्त्वं विपक्षे महाह्रदादा वसत्त्वंच परस्पर मविरुद्धम् । तथा स्तित्व नास्तित्वयो रपि । तयो र्विरोध श्चानुपदमेव स्पष्टं परिहरिष्यते ॥

ननु - अनेकान्तवादे विरोधादयो ऽष्टदोषा स्सम्भवन्ति । तथाहि - एकत्रार्थे विधिप्रतिषेधरूपा वस्तित्व नास्तित्वधर्मौ न-सम्भवतः, शीतोष्णयोरिव भावाभावयोः परस्परं विरोधात् । अस्तित्वंहि भावरूपं, विधिमुखप्रत्ययविषयत्वात् । नास्तित्वंच प्रतिषेधरूपं, नञुल्लिखितप्रतीतिविषयत्वात् । यत्रास्तित्वं तत्र नास्तित्वस्य विरोधः, यत्रच नास्तित्वं तत्रास्तित्वस्य विरोधः, इति विरोधः १॥ अस्तित्वस्या धिकरण मन्य न्नास्तित्वस्या धिकरण मन्य दि त्यस्तित्व नास्तित्वयो र्वैयधिकरण्यम् २ । तच्च विभिन्नाधिकरणवृत्तित्वम् ॥ येन रूपेणा स्तित्वं येनच रूपेण नास्तित्वं तादृशरूपयो रपि प्रत्येक मस्तित्वनास्तित्वात्मकत्वं वक्तव्यम्, तच्च स्वरूपपररूपाभ्यां, तयोरपि प्रत्येक मस्तित्वनास्तित्वात्मकत्वं स्वरूपपररूपाभ्या मित्यनवस्था ३। अप्रामाणिकपदार्थ परम्परापरिकल्पना विश्रान्त्यभाव श्चानवस्थे त्युच्यते ॥ येन रूपेण सत्त्वं तेन रूपेणा सत्त्वस्यापि प्रसंगः, येन रूपेण चासत्त्वं तेन रूपेण सत्त्वस्यापि प्रसंगः, इति संकरः ४। "सर्वेषां युगपत्प्राप्ति स्संकरः ।" इत्यभिधानात् ॥ येन रूपेण-सत्त्वं तेनरूपेणा सत्त्वमेव स्या न्नतु सत्त्वं, येन रूपेणचासत्त्वं तेन सत्त्वमेव स्या न्न त्वसत्त्वं, इति व्यतिकरः "परस्परविषयगमनं

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

व्यतिकरः" इति वचनात ॥ सत्त्वासत्त्वात्मकत्वेच वस्तुन इद-मित्थमेवेति निश्चेतु मशक्ते स्संशयः॥ ततश्चानिश्चयरूपा ऽप्रतिपत्तिः॥ तत स्सत्त्वासत्त्वात्मनो वस्तुनो ऽभावः॥ इति ॥

अत्र वदन्त्यभिज्ञाः। कथंचि त्प्रतीयमाने स्वरूपाद्यपेक्षया विवक्षितयो स्सत्त्वासत्त्वयोः प्रतीयमानयो र्न विरोधः। अनुपलम्भसाध्योहि विरोधः। नहि स्वरूपादिना वस्तुन स्सत्त्वे तदेव पररूपादिभि रसत्त्वस्या नुपलम्भोस्ति। स्वरूपादिभि स्सत्त्वस्येव पररूपादिभि रसत्त्वस्यापि प्रतीतिसिद्धत्वात।

न खलु वस्तुन स्सर्वथा भावएव स्वरूपं, स्वरूपेणेव पररूपेणापि भावप्रसंगात्। नाप्यभावएव, पररूपेणेव स्वरूपेणाप्यभावप्रसंगात्।

ननु - पररूपेणासत्त्वं नाम पररूपासत्त्वमेव। नहि घटे-पटस्वरूपाभावे घटो नास्तीति वक्तुं शक्यम्। भूतले घटाभावे भूतले घटो नास्तीति वाक्यप्रवृत्तिवत् घटे पटस्वरूपाभावे पटो नास्तीत्येव वक्तुमुचितत्वात। इति चेन्न; - विचारासहत्वात। घटादिषु पररूपासत्वं पटादिधर्मो घटधर्मोवा ? नाद्यः, व्याघातात्। नहि पटरूपासत्त्वं पटेऽस्ति। पटस्य शून्यत्वापत्तेः। नच स्वधर्मः स्वस्मिन्नास्तीति वाच्यम्, तस्य स्वधर्मत्व विरोधात्। पटधर्मस्य घटाद्याधारकत्वायोगाच्च। अन्यथा वितानविवितानाकारस्यापि तदाधारकत्व प्रसंगात। अन्त्यपक्षस्वीकारेतु विवादो विश्रान्तः, भावधर्मयोगा द्भावात्मकत्वव दभावधर्मयोगा दभावात्मकत्वस्यापि स्वीकरणीयत्वात्, एवंच घटो नास्तीति प्रयोग

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

उपपन्नः । अन्यथा यथैवा भावधर्मयोगे ष्यस त्त्वस्या तथैव भावधर्म योगेपि सत्त्वस्यात् ।

ननु -- घटे पटरूपासत्वं नाम घट निष्ठाभाव प्रतियोगित्वम् । तच्च पट धर्मः । यथा भूतले घटो नास्ती त्यत्र भूतलनिष्ठाभाव प्रतियोगित्वमेव भूतले नास्तित्वं, तच्च घटधर्मः । इतिचेन्न; - तथापि पररूपाभावस्य घटधर्मत्वाविरोधात, घटाभावस्य भूतल धर्मत्ववत् । तथाच घटस्य भावाभावात्मकत्वं सिद्धम् । कथंचि त्तादात्म्य लक्षणसम्बन्धेन सम्बन्धिन एव स्वधर्मत्वात् ।

नन्वेवंरीत्या घटस्य भावाभावात्मकत्वे सिद्धेपि घटोस्ति पटो नास्तीत्येव वक्तव्यम् । पटाभाव प्रतिपादनपर वाक्यस्य तथा प्रवृत्तेः । यथा भूतळे घटोनास्तीति घटाभावप्रतिपादन परं वाक्यम् प्रवर्तते - नतु भूतलं नास्तीति, तथा प्रकृते पटाभावस्य घटात्मकत्वेपि पटोनास्तीत्येव प्रयोगो युक्तः । अभावबोधकवाक्यस्य प्रतियोगिप्रधानत्वात् । यथा घटप्रागभावस्य कपालात्मकत्वेपि कपालदशायां घटोभविष्यतीत्येव प्रागभाव प्रतिपादकः प्रयोगो दृष्टः, नतु कपालोभविष्यतीति । यथा च घटध्वंसस्यो त्तर कपालात्मकत्वेपि घटोनष्टइत्येव प्रयोगः, तथा प्रकृतेपि । इतिचेदुच्यते ; - घटस्य भावाभावात्मकत्वे सिद्धे ऽस्माकं विवादो विश्रान्तः, समीहितसिद्धेः । शब्दप्रयोगस्तु पूर्वपूर्वप्रयोगानुसारेण भविष्यति । नहि पदार्थ सत्ताधीन श्शब्दप्रयोगः । तथाहि - देवदत्तः पचतीति प्रयोगोवर्तते । तत्र देवदत्तपदार्थ श्शरीरंवा ? आत्मावा ? शरीर विशिष्टात्मावा ? आद्ये देवदत्तस्य शरीरं पचतीति प्रयोगापत्तिः ।

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

द्वितीये देवदत्तस्यात्मा पचतीति प्रयोगापत्तिः । शरीरविशिष्टात्मा-पचतीति प्रयोगाभावा त्तृतीयपक्षेऽपि नोपपत्तिः । तथाच प्रतिपादित-प्रयोगाभावे पूर्वपूर्वप्रयोगाभाव एव शरणम् । तथाच पूर्वपूर्व प्रयोगानुगुण्येन प्रयोगप्रवृत्ते श्शब्दप्रयोगस्य पर्यनुयोगानर्हत्वात ।

किञ्च-घटादौ वर्तमानः पररूपाभावो घटा द्भिन्नोऽभिन्नोवा? यदि भिन्न स्तस्यापि परत्वा त्तदभाव स्तत्र कल्पनीयः । अ-न्यथा तस्य परत्वानुपपत्त्या घटादेः कथंचि दसद्रूपत्वासिद्धेः । तदभावकल्पनायां चानवस्था, तस्यापि परत्वात् । घटादिषु पररूपस्या तानवितानाकारस्या भावाभावपरिकल्पनायां तेषां घट-त्वापत्तिश्च, निषेधद्वयेन प्रकृतरूपसिद्धेः । यद्यभिन्न स्तर्हि सिद्धं स्वस्मा दभिन्नेन भावधर्मेण घटादौ सत्त्वव दभावधर्मेण तादृशेना सत्त्वमपि स्वीकरणीयमिति ।

ननु - स्वरूपेण भावएव पररूपेणाभावः, पररूपेणा भावएवच स्वरूपेण भावइति भावाभावयो रेकत्र वस्तुनि भेदाभावा द्वस्तुनः कुत स्तदुभयात्मकता, इतिचेत; भावाभावापेक्षणीयस्य निमित्तस्य भेदा-दिति ब्रूमः । स्वद्रव्यादिकंहि निमित्त मपेक्ष्य भावप्रत्ययं जनय-त्यर्थः, परद्रव्यादिकंचा भावप्रत्ययं, इत्येकत्वद्वित्वादि संख्या-व देकवस्तुनि भावाभावयो र्भेदः । नह्येकत्र द्रव्ये द्रव्यान्तर मपे-क्ष्य द्वित्वादिसंख्या प्रकाशमाना स्वात्ममात्रापेक्ष्यैकत्वसंख्यातो न्या न प्रतीयते । नाप्येकत्व द्वित्वरूपोभयसंख्या तद्वतो भिन्नैव, द्रव्य स्या संख्येयत्वप्रसंगात् । संख्यासमवाया द्रव्यस्य संख्येयत्व मि-तितुन, कथंचि त्तादात्म्यव्यतिरेकेण समवायासम्भवात । तस्मा-

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

त्सिद्धोऽपेक्षणीयभेदा त्संख्याव त्सत्त्वासत्त्वयो र्भेदः । भिन्नयो श्चा-नयो रेकवस्तुनि प्रतीयमानत्वा त्को विरोधः ।

ननु – सत्त्वासत्त्वयो रेकवस्तुनि प्रतीति र्मिथ्येति चेन्न ; बाधकाभावात् । विरोधो बाधकइति चेन्न ; परस्पराश्रयापत्तेः, सतिहि विरोधे प्रतीते स्तेन बाध्यमानत्वा न्मिथ्यात्वसिद्धिः, तत श्च सत्त्वासत्त्वयो र्विरोधसिद्धिः । इति ।

किञ्च – विरोध स्ताव त्त्रिधा व्यवतिष्ठते, वध्यघातक-भावेन, सहानवस्थानात्मनावा, प्रतिबद्ध्य प्रतिबन्धक रूपे-णवा । तत्राद्ये त्वहिनकुला ग्न्युदकादि विषयः । सचै-कस्मिन् काले वर्तमानयो स्संयोगे सति भवति, संयोगस्यानेकाश्र यत्वात् द्वित्ववत् । नासंयुक्त मुदक मग्निं नाशयति, सर्वत्राग्न्यभा व प्रसंगात् । तत स्सति संयोगे बलीयसो त्तरकाल मितर द्बाध्यते । नहि तथा ऽस्तित्व नास्तित्वयोः क्षणमात्रम प्येकस्मि न्वृत्ति रस्तीति-भवता भ्युपगम्यते, यतो वध्यघातकभावरूपो विरोध स्तयोः क-ल्प्येत । यदिचैकस्मिं स्तयो र्वृत्ति रभ्युपगम्यते, तदा तयो स्तु ल्यबलत्वा न्न वध्यघातक भावः ॥ नापि सहानवस्थान लक्ष-णो विरोधः, सचैकत्र कालभेदेन वर्तमानयो र्भवति, यथा – आम्रफले श्यामतापीततयोः । उत्पद्यमानाहि पीतता पूर्वकालभावि नीं श्यामतां नाशयति । नहि तथाऽस्तित्वनास्तित्वे पूर्वोत्तरकालभा विनी । यदि स्यातां – अस्तित्वकाले नास्तित्वाभावा ज्जीवसत्ता-मात्रं सर्वं प्राप्नुवीत । नास्तित्वकाले चास्तित्वाभावा त्सदाश्रयो बन्धमोक्षादि व्यवहारो विरोध मुपगच्छेत । सर्वथैवासतः पुनरा त्मलाभाभावात, सर्वथाच सतः पुन रभाव प्राप्त्यनुपपत्ते र्नैतयो

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

स्सहानवस्थानं युज्यते ॥ तथास्तित्वनास्तित्वयोः प्रतिबध्य प्रतिबन्धकभावरूप विरोधोपि न सम्भवति । यथा - सति मणिरूपप्रतिबन्धके वह्निना दाहो न जायतइति मणिदाहयोः प्रतिबध्य प्रतिबन्धकभावो युक्तः, नहि तथा ऽस्तित्वकाले नास्तित्वस्य प्रतिबंधः, स्वरूपेणास्तित्वकालेपि पररूपादिना नास्तित्वस्य प्रतीतिसिद्धत्वात, इति ॥

यत्तु शीतोष्णस्पर्शयोरिवेति दृष्टान्तकथनम् , तदसत्, एकत्र धूपघटादा ववच्छेदकभेदेन शीतोष्णस्पर्शयो रुपलम्भा त्तयोरपि विरोधासिद्धेः ।

यथैकत्र चलाचलात्मनो वृक्षादौ रक्तारक्तात्मनो घंटादा वावृतनावृतात्मनो श्शरीरादौ चोपलम्भा दविरोध स्तथा सत्त्वासत्त्वयोरपि ॥

एतेन वैयधिकरण्य मपास्तम् , सत्त्वासत्त्वयो रेकाधिकरणतया प्रतीति सिद्धत्वात ॥

यच्चानवस्थानदूषणमुक्तम् , तदपि नानेकान्तवादिनां दोषः । अनन्तधर्मात्मकस्य वस्तुनः स्वयं प्रमाण प्रतिपन्नत्वेनाभ्युपगमात , अप्रामाणिकपदार्थ परम्परा परिकल्पनाविरहात् ।

एतेन संकरव्यतिकरावपि निरस्तौ, प्रतीति सिद्धेर्थे कस्यापि दोषस्याभावात , दोषाणां प्रतीत्यसिद्ध पदार्थ गोचरत्वात् । संशयादयश्च पूर्वमेव निरस्तमायाः । इत्यन्यत्रविस्तरः ।

अथैव मुपपत्त्या विरोधादि दोषाभावे प्रतिपादितेपि मिथ्यादर्शनाभि निवेशा त्तत्व मप्रतिपद्यमानं पुरुषं प्रति सार्वलौकिक हेतुवाद माश्रित्योच्यते । स्वेष्टार्थ सिद्धिमिच्छताप्रवादिना हेतुः प्रयोक्तव्यः,

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

प्रतिज्ञामात्रेणा र्थसिद्धे रभावात् । सचहेतुः स्वपक्षस्य साधकः परपक्षस्य दूषकश्च । येनरूपेण हेतो स्साधकत्वम् येनच रूपेणदूषकत्वं न तादृशे रूपे हेतो रत्यन्तभिन्ने, तयो र्हेतुधर्मत्वेन हेत्वपेक्षया-कथञ्चि द्भिन्नत्वात् । नहि तयो र्हेत्वपेक्षया ऽनन्यत्वा द्येन रूपेण साधकत्वम् तेन रूपेण दूषकत्वं च सम्भवतीति संकरः, येन रूपेण-साधकत्वं तेन रूपेण दूषकत्वमेवेति व्यतिकरोवा, साधकत्वदूषकत्वयो र्विरोधोवा सम्भवति ; (१) तथाऽनेकान्त प्रक्रियाया मपि विरोधादिदोषानवतारः ।

वस्तुतस्तु- अनेकान्तप्रक्रियायां सर्वेषां प्रवादिनामपि प्रतिपत्तिरेव । एकानेकात्मकस्य वस्तुन स्सर्वसम्मतत्वात् ।

सांख्यास्तावत् - सत्त्वरजस्तमसां साम्यावस्था प्रधानमित्याहुः । तेषां मते प्रसादलाघव शोषतापवारणादि भिन्नस्वभावाना मनेकात्मना मेकप्रधानात्मकत्व स्वीकारेणै कानेकात्मकवस्तुतः स्वीकृतत्वात् । ननु प्रधानं नामैकं वस्तु नास्ति, साम्यावस्था मापन्ना स्सत्व रजस्तमोगुणाएव प्रधानम् , सत्त्वरजस्तमसां समूहे प्रधानपद-शक्ते स्स्वीकारादिति चेन्न ; तथा प्येकानेकात्मकवस्तुस्वीकार-स्या क्षतत्वात् । समुदायसमुदायिनो रभेदा त्समुदायिनां गुणानां मनेकेषां समुदायस्य चैकस्या भेदाभ्युपगमात् ।

---

(१) यथै कस्यैव हेतो रेकरूपेण स्वपक्षसाधकत्वं तद-न्यरूपेण परपक्षदूषकत्व मित्यंगीकारेपि तादृशहेतौ वर्तमानयोः कथंचि द्भिन्नाभिन्नयो स्तादृशरूपयो स्संकरो व्यतिकरो विरोधश्च नसम्भवन्ति, तथैव सत्त्वासत्त्वयो रप्येकत्र वर्तमानयो स्तदभावो निर्बाध इति भावः । (इतिटिप्पणी ॥)

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

नैयायिकास्तु - द्रव्यत्वादिकं सामान्यविशेष मभ्युपगच्छन्ति । अनुवृत्तिव्यावृत्तिप्रत्यय विषयत्वा द्द्रव्यत्वादिकं सामान्यविशेषः । द्रव्यं द्रव्य मित्यनुगत बुद्धिविषयत्वा त्सामान्यम् । गुणो नद्रव्यं कर्म नद्रव्यमिति व्यावृत्तिबुद्धिविषयत्वा द्विशेषइति । एवंच सामान्यविशेषात्मकत्व मेकस्याभ्युपगतम् । एवं गुणत्वं कर्मत्वं च सामान्यविशेषइति बोध्यम् ।

सौगतास्तु - मेचकज्ञान मेक मनेकाकार मभ्युपगच्छन्ति । पञ्चवर्णात्मकं रत्नं मेचकम् । तज्ज्ञानं नैकप्रतिभासात्मकमेव, चित्रज्ञानत्वविरोधात । नीलपीतादि नानाकारज्ञानंहि चित्रज्ञानं, नत्वेकाकारमेव । नापि मेचकज्ञान मनेकमेव, मेचकज्ञान मिद मित्यनुभवविरोधात्, इमानि मेचकज्ञानानी त्यनुभवप्रसंगाच्च । ततश्च सदेकानेकात्मकं चित्रज्ञानं सौगतादीना मभिमतम् ।

चार्वाकास्तु - " पृथिव्यापस्तेजोवायुरिति चत्वारि तत्वानि, तेभ्य श्चैतन्यं, किण्वादिभ्यो मदशक्तिवत् " इति बार्हस्पत्यसूत्रानुरोधा त्पृथिव्यादिभूतचतुष्टयपरिणाम श्चैतन्यमिति वदन्ति । तच्च न पृथिव्याद्यपेक्षया ऽतिरिक्त मेकं तै रभ्युपगम्यते, तत्वान्तर प्रसंगात्, भूतचतुष्टयवादव्याघातात । नापि पृथिव्यादिक मेकैक मेव तत, घटादेरपि चेतनत्वापत्तेः । किन्तु पृथिव्या द्यनेकात्मक मेकं चैतन्यमिति ।

मीमांसकास्तु - प्रमातृप्रमिति प्रमेया कारमेकं ज्ञानम्, घटमहंजानामीत्यनुभवात ; ज्ञानानां स्वतः प्रकाशत्वात, इतिवदन्ति । तत्रानेक पदार्थ निरूपित विषयताश्रा त्येकं ज्ञानं स्वीकृतम् । विषयतानां च ज्ञानस्वरूपत्वा त्तादृशविषयतात्रयात्मकमेकं ज्ञानं स्वीकृत मिति ।

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

एवंरीत्या मतान्तरे ष्वनेकान्त प्रक्रिया बुद्धि मद्भि रूह्येति सर्व मवदातम् ।

अनेकभंगै राक्रान्ता सिद्धान्ताम्बुधिसंगता ।
करोतु विद्वदानन्दं सप्तभंगीतरंगिणी ॥
श्रीम त्पञ्चगुरु देवेभ्यो नमः ।

प्लवंगसंवत्सरे वैशाखशुद्धे अष्टम्यांतिथौ ब्रहस्पतिवासरे पुष्यनक्षत्रे सुकर्मनामयोगे रजिवाकरणे एवंविधगशुभमुहूर्ते 'तंजा' नगरे श्रीमदादितिर्थेश्वरस्वामिसन्निधौ कटकलग्ने वीरनामग्रामवासिना-श्रीमदनन्तसेन देवस्वामिनां प्रियाग्राशिष्येण विमलदासेन सप्तभंगीनाम तर्कग्रन्थो लिखितः ।

करकृतमपराधं क्षन्तुमर्हन्ति सन्तः ।
जिनागमेभ्योजिनमुनिभ्यो नमोनमः ॥

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

For Private and Personal Use Only